# ऋग्वेद मण्डल ४

(२९७)

त्वां ह्य् अ॑ग्ने॒ सद॒म् इत् स॑म॒न्यवो॑ दे॒वासो॑ दे॒वम् अ॑र॒तिं न्ये॑रि॒र इति॒ क्रत्वा॑ न्येरि॒रे ।
अम॑र्त्यं यजत॒ मर्त्ये॒ष्व् आ दे॒वम् आदे॑वं जनत॒ प्रचे॑तसं॒ विश्व॒म् आदे॑वं जनत॒ प्रचे॑तसम् ॥ ४ ००१ ०१
स भ्रात॑रं॒ वरु॑णम् अग्न॒ आ व॑वृत्स्व दे॒वाँ अच्छा॑ सुम॒ती य॒ज्ञव॑नसं॒ ज्येष्ठं॑ य॒ज्ञव॑नसम् ।
ऋ॒तावा॑नम् आदि॒त्यं च॑र्षणी॒धृतं॒ राजा॑नं चर्षणी॒धृत॑म् ॥ ४ ००१ ०२
सखे॒ सखा॑यम् अ॒भ्य् आ व॑वृत्स्वा॒शुं न च॒क्रं रथ्ये॑व॒ रंह्या॒स्मभ्यं॑ दस्म॒ रंह्या॑ ।
अग्ने॑ मृळी॒कं वरु॑णे॒ सचा॑ विदो म॒रुत्सु॑ वि॒श्वभा॑नुषु ।
तो॒काय॑ तु॒जे शु॑शुचान॒ शं कृ॑ध्य् अ॒स्मभ्यं॑ दस्म॒ शं कृ॑धि ॥ ४ ००१ ०३
त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान् दे॒वस्य॒ हेळो ऽव॑ यासिसीष्ठाः ।
यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑चानो॒ विश्वा॒ द्वेषां॑सि॒ प्र मु॑मुग्ध्य् अ॒स्मत् ॥ ४ ००१ ०४
स त्वं नो॑ अग्ने ऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ ।
अव॑ यक्ष्व॒ नो वरु॑णं॒ ररा॑णो वी॒हि मृ॑ळी॒कं सु॒हवो॑ न एधि ॥ ४ ००१ ०५
अ॒स्य श्रेष्ठा॑ सु॒भग॑स्य सं॒दृग् दे॒वस्य॑ चि॒त्रत॑मा॒ मर्त्ये॑षु ।
शुचि॑ घृ॒तं न त॒प्तम् अघ्न्या॑या स्पा॒र्हा दे॒वस्य॑ मं॒हने॑व धे॒नोः ॥ ४ ००१ ०६
त्रिर् अ॑स्य॒ ता प॑र॒मा स॑न्ति स॒त्या स्पा॒र्हा दे॒वस्य॒ जनि॑मान्य् अ॒ग्नेः ।
अ॒न॒न्ते अ॒न्तः परि॑वीत॒ आगा॒च् छुचिः॑ शु॒क्रो अ॒र्यो रोरु॑चानः ॥ ४ ००१ ०७
स दू॒तो विश्वेद् अ॒भि व॑ष्टि॒ सद्मा॒ होता॒ हिर॑ण्यरथो॒ रंसु॑जिह्वः ।
रो॒हिद॑श्वो वपु॒ष्यो॑ वि॒भावा॒ सदा॑ र॒ण्वः पि॑तु॒मती॑व सं॒सत् ॥ ४ ००१ ०८
स चे॑तय॒न् मनु॑षो य॒ज्ञब॑न्धुः॒ प्र तम् म॒ह्या र॑श॒नया॑ नयन्ति ।
स क्षे॑त्य् अस्य॒ दुर्या॑सु॒ साध॑न् दे॒वो मर्त॑स्य सधनि॒त्वम् आ॑प ॥ ४ ००१ ०९
स तू नो॑ अ॒ग्निर् न॑यतु प्रजा॒नन्न् अच्छा॒ रत्नं॑ दे॒वभ॑क्तं॒ यद् अ॑स्य ।
धि॒या यद् विश्वे॑ अ॒मृता॒ अकृ॑ण्व॒न् द्यौष् पि॒ता ज॑नि॒ता स॒त्यम् उ॑क्षन् ॥ ४ ००१ १०
स जा॑यत प्रथ॒मः प॒स्त्या॑सु म॒हो बु॒ध्ने रज॑सो अ॒स्य योनौ॑ ।
अ॒पाद् अ॑शी॒र्षा गु॒हमा॑नो॒ अन्ता॒योयु॑वानो वृष॒भस्य॑ नी॒ळे ॥ ४ ००१ ११
प्र शर्ध॑ आर्त प्रथ॒मं वि॑प॒न्याँ ऋ॒तस्य॒ योना॑ वृष॒भस्य॑ नी॒ळे ।
स्पा॒र्हो युवा॑ वपु॒ष्यो॑ वि॒भावा॑ स॒प्त प्रि॒यासो॑ ऽजनयन्त॒ वृष्णे॑ ॥ ४ ००१ १२

अस्माकम् अत्र पितरो मनुष्या अभि प्र सेदुर् ऋतम् आशुषाणाः ।
अश्मव्रजाः सुदुघा वव्रे अन्तर् उद् उस्रा आजन्न् उषसो हुवानाः ॥ ४ ००१ १३
ते मर्मृजत ददृवांसो अद्रिं तद् एषाम् अन्ये अभितो वि वोचन् ।
पश्वयन्त्रासो अभि कारम् अर्चन् विदन्त ज्योतिश् चकृपन्त धीभिः ॥ ४ ००१ १४
ते गव्यता मनसा दृध्रम् उब्धं गा येमानम् परि षन्तम् अद्रिम् ।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तम् उशिजो वि वव्रुः ॥ ४ ००१ १५
ते मन्वत प्रथमं नाम धेनोस् त्रिः सप्त मातुः परमाणि विन्दन् ।
तज् जानतीर् अभ्य् अनूषत व्रा आविर् भुवद् अरुणीर् यशसा गोः ॥ ४ ००१ १६
नेशत् तमो दुधितं रोचत द्यौर् उद् देव्या उषसो भानुर् अर्त ।
आ सूर्यो बृहतस् तिष्ठद् अज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥ ४ ००१ १७
आद् इत् पश्चा बुबुधाना व्य् अख्यन्न् आद् इद् रत्नं धारयन्त द्युभक्तम् ।
विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यम् अस्तु ॥ ४ ००१ १८
अच्छा वोचेय शुशुचानम् अग्निं होतारं विश्वभरसं यजिष्ठम् ।
शुच्य् ऊधो अतृणन् न गवाम् अन्धो न पूतम् परिषिक्तम् अंशोः ॥ ४ ००१ १९
विश्वेषाम् अदितिर् यज्ञियानां विश्वेषाम् अतिथिर् मानुषाणाम् ।
अग्निर् देवानाम् अव आवृणानः सुमृळीको भवतु जातवेदाः ॥ ४ ००१ २०

(२९८)
यो मर्त्येष्व् अमृत ऋतावा देवो देवेष्व् अरतिर् निधायि ।
होता यजिष्ठो मह्ना शुचध्यै हव्यैर् अग्निर् मनुष ईरयध्यै ॥ ४ ००२ ०१
इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तर् अग्ने ।
दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान् वृषणः शुक्रांश् च ॥ ४ ००२ ०२
अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अन्तर् ईयसे अरुषा युजानो युष्मांश् च देवान् विश आ च मर्तान् ॥ ४ ००२ ०३
अर्यमणं वरुणम् मित्रम् एषाम् इन्द्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एद् उ वह सुहविषे जनाय ॥ ४ ००२ ०४
गोमाँ अग्ने ऽविमाँ अश्वी यज्ञो नृवत्सखा सदम् इद् अप्रमृष्यः ।

इळावाँ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ॥ ४ ००२ ०५
यस् त इध्मं जभरत् सिष्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस् तस्य स्वतवाँः पायुर् अग्ने विश्वस्मात् सीम् अघायत उरुष्य ॥ ४ ००२ ०६
यस् ते भराद् अन्नियते चिद् अन्नं निशिषन् मन्द्रम् अतिथिम् उदीरत् ।
आ देवयुर् इनधते दुरोणे तस्मिन् रयिर् ध्रुवो अस्तु दास्वान् ॥ ४ ००२ ०७
यस् त्वा दोषा य उषसि प्रशंसात् प्रियं वा त्वा कृणवते हविष्मान् ।
अश्वो न स्वे दम आ हेम्यावान् तम् अंहसः पीपरो दाश्वांसम् ॥ ४ ००२ ०८
यस् तुभ्यम् अग्ने अमृताय दाशद् दुवस् त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषन् नैनम् अंहः परि वरद् अघायोः ॥ ४ ००२ ०९
यस्य त्वम् अग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।
प्रीतेद् असद् धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः ॥ ४ ००२ १०
चित्तिम् अचित्तिं चिनवद् वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नः स्वपत्याय देव दितिं च रास्वादितिम् उरुष्य ॥ ४ ००२ ११
कविं शशासुः कवयो ऽदब्धा निधारयन्तो दुर्यास्व् आयोः ।
अतस् त्वं दृश्याँ अग्न एतान् पड्भिः पश्येर् अद्भुताँ अर्य एवैः ॥ ४ ००२ १२
त्वम् अग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।
रत्नम् भर शशमानाय घृष्वे पृथु श्चन्द्रम् अवसे चर्षणिप्राः ॥ ४ ००२ १३
अधा ह यद् वयम् अग्ने त्वाया पड्भिर् हस्तेभिश् चकृमा तनूभिः ।
रथं न क्रन्तो अपसा भुरिजोर् ऋतं येमुः सुध्य आशुषाणाः ॥ ४ ००२ १४
अधा मातुर् उषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन् ।
दिवस् पुत्रा अङ्गिरसो भवेमाद्रिं रुजेम धनिनं शुचन्तः ॥ ४ ००२ १५
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतम् आशुषाणाः ।
शुचीद् अयन् दीधितिम् उक्थशासः क्षामा भिन्दन्तो अरुणीर् अप व्रन् ॥ ४ ००२ १६
सुकर्माणः सुरुचो देवयन्तो ऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं ववृधन्त इन्द्रम् ऊर्वं गव्यम् परिषदन्तो अग्मन् ॥ ४ ००२ १७
आ यूथेव क्षुमति पश्वो अख्यद् देवानां यज् जनिमान्त्य् उग्र ।
मर्तानां चिद् उर्वशीर् अकृप्रन् वृधे चिद् अर्य उपरस्यायोः ॥ ४ ००२ १८
अकर्म ते स्वपसो अभूम ऋतम् अवस्रन्न् उषसो विभातीः ।

अनूनम् अग्निम् पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश् चारु चक्षुः ॥ ४ ००२ १९
एता ते अग्न उचथानि वेधो ऽवोचाम कवये ता जुषस्व ।
उच् छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ॥ ४ ००२ २०

(२९९)
आ वो राजानम् अध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निम् पुरा तनयित्नोर् अचित्ताद् धिरण्यरूपम् अवसे कृणुध्वम् ॥ ४ ००३ ०१
अयं योनिश् चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।
अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ ४ ००३ ०२
आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः ।
देवाय शस्तिम् अमृताय शंस ग्रावेव सोता मधुषुद् यम् ईळे ॥ ४ ००३ ०३
त्वं चिन् नः शम्या अग्ने अस्या ऋतस्य बोध्य् ऋतचित् स्वाधीः ।
कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥ ४ ००३ ०४
कथा ह तद् वरुणाय त्वम् अग्ने कथा दिवे गर्हसे कन् न आगः ।
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कद् अर्यम्णे कद् भगाय ॥ ४ ००३ ०५
कद् धिष्ण्यासु वृधसानो अग्ने कद् वाताय प्रतवसे शुभंये ।
परिज्मने नासत्याय क्षे ब्रवः कद् अग्ने रुद्राय नृघ्ने ॥ ४ ००३ ०६
कथा महे पुष्टिम्भराय पूष्णे कद् रुद्राय सुमखाय हविर्दे ।
कद् विष्णव उरुगायाय रेतो ब्रवः कद् अग्ने शरवे बृहत्यै ॥ ४ ००३ ०७
कथा शर्धाय मरुताम् ऋताय कथा सूरे बृहते पृच्छ्यमानः ।
प्रति ब्रवो ऽदितये तुराय साधा दिवो जातवेदश् चिकित्वान् ॥ ४ ००३ ०८
ऋतेन ऋतं नियतम् ईळ आ गोर् आमा सचा मधुमत् पक्वम् अग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥ ४ ००३ ०९
ऋतेन हि ष्मा वृषभश् चिद् अक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।
अस्पन्दमानो अचरद् वयोधा वृषा शुक्रं दुदुहे पृश्निर् ऊधः ॥ ४ ००३ १०
ऋतेनाद्रिं व्य् असन् भिदन्तः सम् अङ्गिरसो नवन्त गोभिः ।
शुनं नरः परि षदन्न् उषासम् आविः स्वर् अभवज् जाते अग्नौ ॥ ४ ००३ ११

ऋ॒तेन॑ दे॒वीर् अ॒मृता॒ अमृ॑क्ता॒ अर्णो॑भि॒र् आपो॒ मधु॑मद्भिर् अग्ने ।
वा॒जी न सर्गे॑षु प्रस्तुभा॒नः प्र स॒दम् इत् स्रवि॑तवे दधन्युः ॥ ४ ००३ १२
मा कस्य॑ य॒क्षं सद॒म् इद् धु॒रो गा॒ मा वे॒शस्य॑ प्रमिन॒तो मापेः ।
मा भ्रातु॑र् अग्ने॒ अनृ॑जोर् ऋ॒णं वे॒र् मा सख्यु॒र् दक्षं॑ रि॒पोर् भु॑जेम ॥ ४ ००३ १३
रक्षा॑ णो अग्ने॒ तव॒ रक्ष॑णेभी रारक्षा॒णः सु॑मख प्रीणा॒नः ।
प्रति॑ ष्फुर॒ वि रु॑ज वी॒ड्व् अंहो॑ ज॒हि रक्षो॒ महि॑ चिद् वावृधा॒नम् ॥ ४ ००३ १४
ए॒भिर् भ॑व सु॒मना॑ अग्ने अ॒र्कैर् इ॒मान् स्पृ॑श॒ मन्म॑भिः शू॒र वाजा॑न् ।
उ॒त ब्रह्मा॑ण्य् अङ्गिरो जुषस्व॒ सं ते॑ श॒स्तिर् दे॒ववा॑ता जरेत ॥ ४ ००३ १५
ए॒ता विश्वा॑ वि॒दुषे॒ तुभ्यं॑ वेधो नी॒थान्य् अ॑ग्ने नि॒ण्या वचां॑सि ।
नि॒वच॑ना क॒वये॒ काव्या॒न्य् अशं॑सिषम् म॒तिभि॒र् विप्र॑ उ॒क्थैः ॥ ४ ००३ १६

(३००)
कृ॒णु॒ष्व पाजः॒ प्रसि॑तिं न पृ॒थ्वीं या॒हि राजे॒वाम॑वाँ॒ इभे॑न ।
तृ॒ष्वीम् अनु॒ प्रसि॑तिं द्रूणा॒नो ऽस्ता॑सि॒ विध्य॑ र॒क्षस॒स् तपि॑ष्ठैः ॥ ४ ००४ ०१
तव॑ भ्र॒मास॑ आशु॒या प॑तन्त्य् अनु॑ स्पृश धृष॒ता शोशु॑चानः ।
तपूं॑ष्य् अग्ने जु॒ह्वा॑ पतं॒गान् अस॑न्दितो॒ वि सृ॑ज॒ विष्व॑ग् उ॒ल्काः ॥ ४ ००४ ०२
प्रति॒ स्पशो॒ वि सृ॑ज॒ तूर्णि॑तमो॒ भवा॑ पा॒युर् वि॒शो अ॒स्या अद॑ब्धः ।
यो नो॑ दू॒रे अ॒घशं॑सो॒ यो अन्त्य् अग्ने॒ माकि॑ष् टे॒ व्यथि॒र् आ द॑धर्षीत् ॥ ४ ००४ ०३
उद् अ॑ग्ने तिष्ठ॒ प्रत्य् आ त॑नुष्व॒ न्य् अ॒ १ मित्राँ॑ ओषतात् तिग्महेते ।
यो नो॒ अरा॑तिं समिधान च॒क्रे नी॒चा तं ध॑क्ष्य् अत॒सं न शुष्क॑म् ॥ ४ ००४ ०४
ऊ॒र्ध्वो भ॑व॒ प्रति॑ वि॒ध्याध्य् अ॒स्मद् आ॒विष् कृ॑णुष्व॒ दैव्या॑न्य् अग्ने ।
अव॑ स्थि॒रा त॑नुहि यातु॒जूनां॑ जा॒मिम् अजा॑मि॒म् प्र मृ॑णीहि॒ शत्रू॑न् ॥ ४ ००४ ०५
स ते॑ जानाति सु॒मतिं य॑विष्ठ॒ य ईव॑ते॒ ब्रह्म॑णे गा॒तुम् ऐर॑त् ।
विश्वा॑न्य् अस्मै सु॒दिना॑नि रा॒यो द्यु॒म्नान्य् अ॒र्यो वि दुरो॑ अ॒भि द्यौ॑त् ॥ ४ ००४ ०६
सेद् अ॑ग्ने अस्तु सु॒भगः॑ सु॒दानु॒र् यस् त्वा॒ नित्ये॑न ह॒विषा॒ य उ॒क्थैः ।
पिप्री॑षति॒ स्व आयु॑षि दुरो॒णे विश्वेद् अ॑स्मै सु॒दिना॒ सास॑द् इ॒ष्टिः ॥ ४ ००४ ०७
अर्चा॑मि ते सु॒मतिं घोष्य् अ॒र्वाक् सं ते॑ वा॒वाता॑ जरताम् इ॒यं गीः ।

स्वश्वा॑स् त्वा सु॒रथा॑ मर्जयेमा॒स्मे क्ष॒त्राणि॑ धारये॒र् अनु॒ द्यून् ॥ ४ ००४ ०८
इ॒ह त्वा॒ भूर्य् आ च॑रे॒द् उप॒ त्मन् दोषा॑वस्त॒र् दीदि॒वांस॑म् अनु॒ द्यून् ।
क्रीळ॑न्तस् त्वा सु॒मन॑सः सपेमा॒भि द्यु॒म्ना त॑स्थि॒वांसो॒ जना॑नाम् ॥ ४ ००४ ०९
यस् त्वा॒ स्वश्वः॑ सुहि॒रण्यो अ॑ग्न उप॒याति॒ वसु॑मता॒ रथे॑न ।
तस्य॑ त्रा॒ता भ॑वसि॒ तस्य॒ सखा॒ यस् त॑ आति॒थ्यम् आ॑नु॒षग् जुजो॑षत् ॥ ४ ००४ १०
म॒हो रु॑जामि ब॒न्धुता॒ वचो॑भि॒स् तन् मा॑ पि॒तुर् गोत॑मा॒द् अन्व् इ॑याय ।
त्वं नो॑ अ॒स्य वच॑सश् चिकिद्धि॒ होत॑र् यविष्ठ सुक्रतो॒ दमू॑नाः ॥ ४ ००४ ११
अस्व॑प्नजस् त॒रण॑यः सु॒शेवा॒ अत॑न्द्रासो ऽवृ॒का अश्र॑मिष्ठाः ।
ते पा॒यवः॑ स॒ध्र्यञ्चो॒ नि॒षद्याग्ने॒ तव॑ नः पान्त्व् अमूर ॥ ४ ००४ १२
ये पा॒यवो॑ मामते॒यं ते॑ अग्ने॒ पश्य॑न्तो अ॒न्धं दु॑रि॒ताद् अर॑क्षन् ।
र॒रक्ष॒ तान् सु॒कृतो॑ वि॒श्ववे॑दा॒ दिप्स॑न्त॒ इद् रि॒पवो॒ नाह॑ देभुः ॥ ४ ००४ १३
त्वया॑ व॒यं स॑धन्य॒१ स् त्वोता॒स् तव॒ प्रणी॑त्य् अश्याम॒ वाजा॑न् ।
उ॒भा शंसा॑ सूदय सत्यताते ऽनुष्ठु॒या कृ॑णुह्य् अह्रयाण ॥ ४ ००४ १४
अ॒या ते॑ अग्ने स॒मिधा॑ विधेम॒ प्रति॒ स्तोमं॑ श॒स्यमा॑नं गृभाय ।
द॒हाशसो॑ र॒क्षसः॑ पा॒ह्य् अ॒१ स्मान् द्रु॒हो नि॒दो मि॑त्रमहो अव॒द्यात् ॥ ४ ००४ १५

(३०१)
वै॒श्वा॒नराय॑ मी॒ळ्हुषे॑ स॒जोषाः॑ क॒था दा॑शेमा॒ग्नये॑ बृ॒हद् भाः ।
अनू॑नेन बृह॒ता व॒क्षथे॒नोप॑ स्तभायद् उप॒मिन् न रोधः॑ ॥ ४ ००५ ०१
मा निन्दत॒ य इ॒माम् मह्यं॑ रा॒तिं दे॒वो द॒दौ मर्त्या॑य स्व॒धावा॑न् ।
पाका॑य॒ गृत्सो॑ अ॒मृतो॒ विचे॑ता वैश्वान॒रो नृत॑मो य॒ह्वो अ॒ग्निः ॥ ४ ००५ ०२
साम॑ द्वि॒बर्हा॒ महि॑ ति॒ग्मभृ॑ष्टिः स॒हस्र॑रेता वृ॒षभस् तुवि॑ष्मान् ।
प॒दं न गोर् अप॑गूळ्हं विवि॒द्वान् अ॒ग्निर् मह्य॒म् प्रेद् उ॑ वोचन् मनी॒षाम् ॥ ४ ००५ ०३
प्र ताँ अ॒ग्निर् ब॑भसत् ति॒ग्मज॑म्भस् तपि॑ष्ठेन॒ शोचि॑षा॒ यः सु॒राधाः॑ ।
प्र ये मि॒नन्ति॒ वरु॑णस्य॒ धाम॑ प्रि॒या मि॒त्रस्य॒ चेत॑तो ध्रु॒वाणि॑ ॥ ४ ००५ ०४
अ॒भ्रा॒तरो॒ न योष॑णो॒ व्यन्तः॑ पति॒रिपो॒ न जन॑यो दु॒रेवाः॑ ।
पा॒पासः॒ सन्तो॑ अनृ॒ता अ॑स॒त्या इ॒दम् प॒दम् अ॑जनता गभी॒रम् ॥ ४ ००५ ०५

इ॒दम् मे॑ अग्ने॒ किय॑ते पाव॒काऽमि॑नते गु॒रुम् भा॒रं न मन्म॑ ।
बृ॒हद् द॑धाथ धृ॒षता॑ ग॑भी॒रं य॒ह्वम् पृ॒ष्ठम् प्रय॑सा स॒प्तधा॑तु ॥ ४ ००५ ०६
तम् इन् न्व् ए॒३ व स॑म॒ना स॑मा॒नम् अ॒भि क्रत्वा॑ पुन॒ती धी॒तिर् अ॑श्याः ।
स॒सस्य॒ चर्म॒न्न् अधि॒ चारु॒ पृश्ने॒र् अग्रे॑ रु॒प आरु॑पितं॒ जबा॑रु ॥ ४ ००५ ०७
प्र॒वाच्यं॒ वच॑सः॒ किम् मे॑ अ॒स्य गुहा॑ हि॒तम् उप॑ नि॒णिग् व॑दन्ति ।
यद् उ॒स्रिया॑णा॒म् अप॒ वार् इ॑व॒ व्रन् पाति॑ प्रि॒यं रु॒पो अग्र॑म् प॒दं वेः ॥ ४ ००५ ०८
इ॒दम् उ॒ त्यन् महि॑ म॒हाम् अनी॑कं॒ यद् उ॒स्रिया॒ सच॑त पू॒र्व्यं गौः ।
ऋ॒तस्य॑ प॒दे अधि॒ दीद्या॑नं॒ गुहा॑ रघु॒ष्यद् र॑घु॒यद् वि॑वेद ॥ ४ ००५ ०९
अध॑ द्युता॒नः पि॒त्रोः सचा॒साम॑नुत॒ गुह्यं॒ चारु॒ पृश्नेः॑ ।
मा॒तुष् प॒दे प॑र॒मे अन्ति॒ षद् गोर् वृष्णः॑ शो॒चिषः॒ प्रय॑तस्य जि॒ह्वा ॥ ४ ००५ १०
ऋ॒तं वो॑चे॒ नम॑सा पृ॒च्छ्यमा॑न॒स् तवा॒शसा॑ जातवेदो॒ यदी॒दम् ।
त्वम् अ॒स्य क्ष॑यसि॒ यद् ध॒ विश्वं॑ दि॒वि यद् उ॒ द्रवि॑णं॒ यत् पृ॑थि॒व्याम् ॥ ४ ००५ ११
किं नो॑ अ॒स्य द्रवि॑णं॒ कद् ध॒ रत्नं॒ वि नो॑ वोचो जातवेदश् चिकि॒त्वान् ।
गुहाध्व॑नः पर॒मं यन् नो॑ अ॒स्य रेकु॑ प॒दं न नि॑दा॒ना अग॑न्म ॥ ४ ००५ १२
का म॒र्यादा॑ व॒युना॒ कद् ध॑ वा॒मम् अच्छा॑ गमेम र॒घवो॒ न वाज॑म् ।
क॒दा नो॑ दे॒वीर् अ॒मृत॑स्य॒ पत्नीः॒ सूरो॒ वर्णे॑न ततनन्न् उ॒षासः॑ ॥ ४ ००५ १३
अ॒नि॒रेण॒ वच॑सा फ॒ल्ग्वेन॑ प्र॒तीत्ये॑न कृ॒धुना॑तृ॒पासः॑ ।
अधा॒ ते अ॑ग्ने॒ किम् इ॒हा व॑दन्त्य् अनायु॒धास॒ आस॑ता सचन्ताम् ॥ ४ ००५ १४
अ॒स्य श्रि॒ये समि॑धा॒नस्य॒ वृष्णो॒ वसो॒र् अनी॑कं॒ दम॒ आ रु॑रोच ।
रुश॒द् वसा॑नः सु॒दृशी॑करूपः क्षि॒तिर् न रा॒या पु॑रु॒वारो॑ अद्यौत् ॥ ४ ००५ १५

(३०२)
ऊ॒र्ध्व ऊ॒ षु णो॑ अध्व॒रस्य॑ होत॒र् अग्ने॒ तिष्ठ॑ दे॒वता॑ता॒ यजी॑यान् ।
त्वं हि विश्व॑म् अ॒भ्य् असि॒ मन्म॒ प्र वे॒धस॑श् चित् तिरसि मनी॒षाम् ॥ ४ ००६ ०१
अमू॑रो॒ होता॒ न्य् असादि वि॒क्ष्व् अ॒१ ग्निर् म॒न्द्रो वि॒दथे॑षु॒ प्रचे॑ताः ।
ऊ॒र्ध्वम् भा॒नुं स॑वि॒तेवा॑श्रे॒न् मेते॑व धू॒मं स्त॑भाय॒द् उप॒ द्याम् ॥ ४ ००६ ०२
य॒ता सु॒जू॒र्णी रा॒तिनी॑ घृ॒ताची॑ प्रदक्षि॒णिद् दे॒वता॑तिम् उरा॒णः ।

उद् उ स्वरुर् नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥ ४ ००६ ०३
स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर् जुजुषाणो अस्थात् ।
पर्य् अग्निः पशुपा न होता त्रिविष्ट्य् एति प्रदिव उराणः ॥ ४ ००६ ०४
परि त्मना मितद्रुर् एति होताग्निर् मन्द्रो मधुवचा ऋतावा ।
द्रवन्त्य् अस्य वाजिनो न शोका भयन्ते विश्वा भुवना यद् अभ्राट् ॥ ४ ००६ ०५
भद्रा ते अग्ने स्वनीक संदृग् घोरस्य सतो विषुणस्य चारुः ।
न यत् ते शोचिस् तमसा वरन्त न ध्वस्मानस् तन्वी३ रेप आ धुः ॥ ४ ००६ ०६
न यस्य सातुर् जनितोर् अवारि न मातरापितरा नू चिद् इष्टौ ।
अधा मित्रो न सुधितः पावको ऽग्निर् दीदाय मानुषीषु विक्षु ॥ ४ ००६ ०७
द्विर् यम् पञ्च जीजनन् संवसानाः स्वसारो अग्निम् मानुषीषु विक्षु ।
उषर्बुधम् अथर्यो३ न दन्तं शुक्रं स्वासम् परशुं न तिग्मम् ॥ ४ ००६ ०८
तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वञ्चः स्वञ्चः ।
अरुषासो वृषण ऋजुमुष्का आ देवतातिम् अह्वन्त दस्माः ॥ ४ ००६ ०९
ये ह त्ये ते सहमाना अयासस् त्वेषासो अग्ने अर्चयश् चरन्ति ।
श्येनासो न दुवसनासो अर्थं तुविष्वणसो मारुतं न शर्धः ॥ ४ ००६ १०
अकारि ब्रह्म समिधान तुभ्यं शंसात्य् उक्थं यजते व्य् ऊ धाः ।
होतारम् अग्निम् मनुषो नि षेदुर् नमस्यन्त उशिजः शंसम् आयोः ॥ ४ ००६ ११

(३०३)
अयम् इह प्रथमो धायि धातृभिर् होता यजिष्ठो अध्वरेष्व् ईड्यः ।
यम् अप्नवानो भृगवो विरुरुचुर् वनेषु चित्रं विभ्वं विशे-विशे ॥ ४ ००७ ०१
अग्ने कदा त आनुषग् भुवद् देवस्य चेतनम् ।
अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्व् ईड्यम् ॥ ४ ००७ ०२
ऋतावानं विचेतसम् पश्यन्तो द्याम् इव स्तृभिः ।
विश्वेषाम् अध्वराणां हस्कर्तारं दमे-दमे ॥ ४ ००७ ०३
आशुं दूतं विवस्वतो विश्वा यश् चर्षणीर् अभि ।
आ जभ्रुः केतुम् आयवो भृगवाणं विशे-विशे ॥ ४ ००७ ०४

तम् ई होतारम् आनुषक् चिकित्वांसं नि षेदिरे ।
रण्वम् पावकशोचिषं यजिष्ठं सप्त धामभिः ॥ ४ ००७ ०५
तं शश्वतीषु मातृषु वन आ वीतम् अश्रितम् ।
चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम् ॥ ४ ००७ ०६
ससस्य यद् वियुता सस्मिन्न् ऊधन्न् ऋतस्य धामन् रणयन्त देवाः ।
महाँ अग्निर् नमसा रातहव्यो वेर् अध्वराय सदम् इद् ऋतावा ॥ ४ ००७ ०७
वेर् अध्वरस्य दूत्यानि विद्वान् उभे अन्ता रोदसी संचिकित्वान् ।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ॥ ४ ००७ ०८
कृष्णं त एम रुशतः पुरो भाश् चरिष्ण्व् अ १ र्चिर् वपुषाम् इद् एकम् ।
यद् अप्रवीता दधते ह गर्भं सद्यश् चिज् जातो भवसीद् उ दूतः ॥ ४ ००७ ०९
सद्यो जातस्य ददृशानम् ओजो यद् अस्य वातो अनुवाति शोचिः ।
वृणक्ति तिग्माम् अतसेषु जिह्वां स्थिरा चिद् अन्ना दयते वि जम्भैः ॥ ४ ००७ १०
तृषु यद् अन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेळिं सचते निजूर्वन्न् आशुं न वाजयते हिन्वे अर्वा ॥ ४ ००७ ११

(३०४)
दूतं वो विश्ववेदसं हव्यवाहम् अमर्त्यम् ।
यजिष्ठम् ऋञ्जसे गिरा ॥ ४ ००८ ०१
स हि वेदा वसुधितिम् महाँ आरोधनं दिवः ।
स देवाँ एह वक्षति ॥ ४ ००८ ०२
स वेद देव आनमं देवाँ ऋतायते दमे ।
दाति प्रियाणि चिद् वसु ॥ ४ ००८ ०३
स होता सेद् उ दूत्यं चिकित्वाँ अन्तर् ईयते ।
विद्वाँ आरोधनं दिवः ॥ ४ ००८ ०४
ते स्याम ये अग्नये ददाशुर् हव्यदातिभिः ।
य ईम् पुष्यन्त इन्धते ॥ ४ ००८ ०५
ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे ।

ये अ॒ग्ना द॑धि॒रे दुव॑: ॥ ४ ००८ ०६
अ॒स्मे रायो॑ दि॒वे-दि॑वे सं च॑रन्तु पु॒रु॒स्पृह॑: ।
अ॒स्मे वाजा॑स ईरताम् ॥ ४ ००८ ०७
स विप्र॑श् चर्षणी॒नां शव॑सा॒ मानु॑षाणाम् ।
अति॑ क्षि॒प्रेव॑ विध्यति ॥ ४ ००८ ०८

(३०५)
अग्ने॑ मृ॒ळ म॒हाँ अ॑सि॒ य ई॒म् आ दे॑व॒युं जन॑म् ।
इ॒येथ॑ ब॒र्हिर् आ॒सद॑म् ॥ ४ ००९ ०१
स मानु॑षीषु दू॒ळभो॑ वि॒क्षु प्रा॒वीर् अम॑र्त्यः ।
दू॒तो विश्वे॑षाम् भुवत् ॥ ४ ००९ ०२
स सद्म॒ परि॑ णीयते॒ होता॑ म॒न्द्रो दिवि॑ष्टिषु ।
उ॒त पोता॒ नि षी॑दति ॥ ४ ००९ ०३
उ॒त ग्ना अ॒ग्निर् अ॑ध्व॒र उ॒तो गृ॒हप॑ति॒र् दमे॑ ।
उ॒त ब्र॒ह्मा नि षी॑दति ॥ ४ ००९ ०४
वेषि॒ ह्य॑ध्वरीय॒ताम् उ॑पव॒क्ता जना॑नाम् ।
ह॒व्या च॒ मानु॑षाणाम् ॥ ४ ००९ ०५
वेषीद् व् अ॑स्य दू॒त्य॒ं॑ यस्य॒ जुजो॑षो अध्व॒रम् ।
ह॒व्यम् मर्त॑स्य॒ वोळ्ह॑वे ॥ ४ ००९ ०६
अ॒स्माक॑ं जोष्य् अध्वरम् अ॒स्माक॑ं य॒ज्ञम् अ॑ङ्गिरः ।
अ॒स्माक॑ं शृणुधी॒ हव॑म् ॥ ४ ००९ ०७
परि॑ ते दू॒ळभो॒ रथो॑ ऽ॒स्माँ अ॑श्नोतु वि॒श्वत॑: ।
येन॒ रक्ष॑सि दा॒शुष॑: ॥ ४ ००९ ०८

(३०६)
अग्ने॒ तम् अ॒द्याश्वं॒ न स्तोमै॒ः क्रतु॒ं न भ॒द्रं हृ॑दि॒स्पृश॑म् ।
ऋ॒ध्यामा॑ त॒ ओहै॑: ॥ ४ ०१० ०१

अधा ह्य् अग्ने क्रतोर् भद्रस्य दक्षस्य साधोः ।
रथीर् ऋतस्य बृहतो बभूथ ॥ ४ ०१० ०२
एभिर् नो अर्कैर् भवा नो अर्वाङ् स्व१र् ण ज्योतिः ।
अग्ने विश्वेभिः सुमना अनीकैः ॥ ४ ०१० ०३
आभिष् टे अद्य गीर्भिर् गृणन्तो ऽग्ने दाशेम ।
प्र ते दिवो न स्तनयन्ति शुष्माः ॥ ४ ०१० ०४
तव स्वादिष्ठाग्ने संदृष्टिर् इदा चिद् अह्न इदा चिद् अक्तोः ।
श्रिये रुक्मो न रोचत उपाके ॥ ४ ०१० ०५
घृतं न पूतं तनूर् अरेपाः शुचि हिरण्यम् ।
तत् ते रुक्मो न रोचत स्वधावः ॥ ४ ०१० ०६
कृतं चिद् धि ष्मा सनेमि द्वेषो ऽग्न इनोषि मर्तात् ।
इत्था यजमानाद् ऋतावः ॥ ४ ०१० ०७
शिवा नः सख्या सन्तु भ्रात्राग्ने देवेषु युष्मे ।
सा नो नाभिः सदने सस्मिन्न् ऊधन् ॥ ४ ०१० ०८

(३०७)
भद्रं ते अग्ने सहसिन्न् अनीकम् उपाक आ रोचते सूर्यस्य ।
रुशद् दृशे ददृशे नक्तया चिद् अरूक्षितं दृश आ रूपे अन्नम् ॥ ४ ०११ ०१
वि षाह्य् अग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः ।
विश्वेभिर् यद् वावनः शुक्र देवैस् तन् नो रास्व सुमहो भूरि मन्म ॥ ४ ०११ ०२
त्वद् अग्ने काव्या त्वन् मनीषास् त्वद् उक्था जायन्ते राध्यानि ।
त्वद् एति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ॥ ४ ०११ ०३
त्वद् वाजी वाजम्भरो विहाया अभिष्टिकृज् जायते सत्यशुष्मः ।
त्वद् रयिर् देवजूतो मयोभुस् त्वद् आशुर् जूजुवाँ अग्ने अर्वा ॥ ४ ०११ ०४
त्वाम् अग्ने प्रथमं देवयन्तो देवम् मर्ता अमृत मन्द्रजिह्वम् ।
द्वेषोयुतम् आ विवासन्ति धीभिर् दमूनसं गृहपतिम् अमूरम् ॥ ४ ०११ ०५
आरे अस्मद् अमतिम् आरे अंह आरे विश्वां दुर्मतिं यन् निपासि ।

दोषा शिवः सहसः सूनो अग्ने यं देव आ चित् सचसे स्वस्ति ॥ ४ ०११ ०६

(३०८)
यस् त्वाम् अग्न इनधते यतस्रुक् त्रिस् ते अन्नं कृणवत् सस्मिन्न् अहन् ।
स सु द्युम्नैर् अभ्य् अस्तु प्रसक्षत् तव क्रत्वा जातवेदश् चिकित्वान् ॥ ४ ०१२ ०१
इध्मं यस् ते जभरच् छश्रमाणो महो अग्ने अनीकम् आ सपर्यन् ।
स इधानः प्रति दोषाम् उषासम् पुष्यन् रयिं सचते घ्नन्न् अमित्रान् ॥ ४ ०१२ ०२
अग्निर् ईशे बृहतः क्षत्रियस्याग्निर् वाजस्य परमस्य रायः ।
दधाति रत्नं विधते यविष्ठो व्य् आनुषङ् मर्त्याय स्वधावान् ॥ ४ ०१२ ०३
यच् चिद् धि ते पुरुषत्रा यविष्ठाचित्तिभिश् चकृमा कच् चिद् आगः ।
कृधी ष्व् अ १ स्माँ अदितेर् अनागान् व्य् एनांसि शिश्रथो विष्वग् अग्ने ॥ ४ ०१२
०४
महश् चिद् अग्न एनसो अभीक ऊर्वाद् देवानाम् उत मर्त्यानाम् ।
मा ते सखायः सदम् इद् रिषाम यच्छा तोकाय तनयाय शं योः ॥ ४ ०१२ ०५
यथा ह त्यद् वसवो गौर्यं चित् पदि षिताम् अमुञ्चता यजत्राः ।
एवो ष्व् अ १ स्मन् मुञ्चता व्य् अंहः प्र तार्य् अग्ने प्रतरं न आयुः ॥ ४ ०१२ ०६

(३०९)
प्रत्य् अग्निर् उषसाम् अग्रम् अख्यद् विभातीनां सुमना रत्नधेयम् ।
यातम् अश्विना सुकृतो दुरोणम् उत् सूर्यो ज्योतिषा देव एति ॥ ४ ०१३ ०१
ऊर्ध्वम् भानुं सविता देवो अश्रेद् द्रप्सं दविध्वद् गविषो न सत्वा ।
अनु व्रतं वरुणो यन्ति मित्रो यत् सूर्यं दिव्य् आरोहयन्ति ॥ ४ ०१३ ०२
यं सीम् अकृण्वन् तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् ।
तं सूर्यं हरितः सप्त यह्वी स्पशं विश्वस्य जगतो वहन्ति ॥ ४ ०१३ ०३
वहिष्ठेभिर् विहरन् यासि तन्तुम् अवव्ययन्न् असितं देव वस्म ।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस् तमो अप्स्व् अ १ न्तः ॥ ४ ०१३ ०४

अनायतो अनिबद्धः कथायं न्यङ्ङ् उत्तानो ऽव पद्यते न ।
कया याति स्वधया को ददर्श दिव स्कम्भः समृतः पाति नाकम् ॥ ४ ०१३ ०५

(३१०)
प्रत्य् अग्निर् उषसो जातवेदा अख्यद् देवो रोचमाना महोभिः ।
आ नासत्योरुगाया रथेनेमं यज्ञम् उप नो यातम् अच्छ ॥ ४ ०१४ ०१
ऊर्ध्वं केतुं सविता देवो अश्रेज् ज्योतिर् विश्वस्मै भुवनाय कृण्वन् ।
आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश् चेकितानः ॥ ४ ०१४ ०२
आवहन्त्य् अरुणीर् ज्योतिषागान् मही चित्रा रश्मिभिश् चेकिताना ।
प्रबोधयन्ती सुविताय देव्य् उ१ षा ईयते सुयुजा रथेन ॥ ४ ०१४ ०३
आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ ।
इमे हि वाम् मधुपेयाय सोमा अस्मिन् यज्ञे वृषणा मादयेथाम् ॥ ४ ०१४ ०४
अनायतो अनिबद्धः कथायं न्यङ्ङ् उत्तानो ऽव पद्यते न ।

(३११)
अग्निर् होता नो अध्वरे वाजी सन् परि णीयते ।
देवो देवेषु यज्ञियः ॥ ४ ०१५ ०१
परि त्रिविष्ट्य् अध्वरं यात्य् अग्नी रथीर् इव ।
आ देवेषु प्रयो दधत् ॥ ४ ०१५ ०२
परि वाजपतिः कविर् अग्निर् हव्यान्य् अक्रमीत् ।
दधद् रत्नानि दाशुषे ॥ ४ ०१५ ०३
अयं यः सृञ्जये पुरो दैववाते समिध्यते ।
द्युमाँ अमित्रदम्भनः ॥ ४ ०१५ ०४
अस्य घा वीर ईवतो ऽग्नेर् ईशीत मर्त्यः ।
तिग्मजम्भस्य मीळ्हुषः ॥ ४ ०१५ ०५
तम् अर्वन्तं न सानसिम् अरुषं न दिवः शिशुम् ।

मर्मृज्यन्ते दिवे-दिवे ॥ ४ ०१५ ०६
बोधद् यन् मा हरिभ्यां कुमारः साहदेव्यः ।
अच्छा न हूत उद् अरम् ॥ ४ ०१५ ०७
उत त्या यजता हरी कुमारात् साहदेव्यात् ।
प्रयता सद्य आ ददे ॥ ४ ०१५ ०८
एष वां देवाव् अश्विना कुमारः साहदेव्यः ।
दीर्घायुर् अस्तु सोमकः ॥ ४ ०१५ ०९
तं युवं देवाव् अश्विना कुमारं साहदेव्यम् ।
दीर्घायुषं कृणोतन ॥ ४ ०१५ १०

(३१२)
आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्व् अस्य हरय उप नः ।
तस्मा इद् अन्धः सुषुमा सुदक्षम् इहाभिपित्वं करते गृणानः ॥ ४ ०१६ ०१
अव स्य शूराध्वनो नान्ते ऽस्मिन् नो अद्य सवने मन्दध्यै ।
शंसात्य् उक्थम् उशनेव वेधाश् चिकितुषे असुर्याय मन्म ॥ ४ ०१६ ०२
कविर् न निण्यं विदथानि साधन् वृषा यत् सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत् सप्त कारून् अह्ना चिच् चक्रुर् वयुना गृणन्तः ॥ ४ ०१६ ०३
स्व१र् यद् वेदि सुदृशीकम् अर्कैर् महि ज्योती रुरुचुर् यद् ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे नृभ्यश् चकार नृतमो अभिष्टौ ॥ ४ ०१६ ०४
ववक्ष इन्द्रो अमितम् ऋजीष्य् उ१भे आ पप्रौ रोदसी महित्वा ।
अतश् चिद् अस्य महिमा वि रेच्य् अभि यो विश्वा भुवना बभूव ॥ ४ ०१६ ०५
विश्वानि शक्रो नर्याणि विद्वान् अपो रिरेच सखिभिर् निकामैः ।
अश्मानं चिद् ये बिभिदुर् वचोभिर् व्रजं गोमन्तम् उशिजो वि वव्रुः ॥ ४ ०१६ ०६
अपो वृत्रं वव्रिवांसम् पराहन् प्रावत् ते वज्रम् पृथिवी सचेताः ।
प्रार्णांसि समुद्रियाण्य् ऐनोः पतिर् भवञ् छवसा शूर धृष्णो ॥ ४ ०१६ ०७
अपो यद् अद्रिम् पुरुहूत दर्दर् आविर् भुवत् सरमा पूर्व्यं ते ।
स नो नेता वाजम् आ दर्षि भूरिं गोत्रा रुजन्न् अङ्गिरोभिर् गृणानः ॥ ४ ०१६ ०८

अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन् नाधमानम् ।
ऊतिभिस् तम् इषणो द्युम्नहूतौ नि मायावान् अब्रह्मा दस्युर् अर्त ॥ ४ ०१६ ०९
आ दस्युघ्ना मनसा याह्य् अस्तम् भुवत् ते कुत्सः सख्ये निकामः ।
स्वे योनौ नि षदतं सरूपा वि वां चिकित्सद् ऋतचिद् ध नारी ॥ ४ ०१६ १०
यासि कुत्सेन सरथम् अवस्युस् तोदो वातस्य हर्योर् ईशानः ।
ऋज्रा वाजं न गध्यं युयूषन् कविर् यद् अहन् पार्याय भूषात् ॥ ४ ०१६ ११
कुत्साय शुष्णम् अशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।
सद्यो दस्यून् प्र मृण कुत्स्येन प्र सूरश् चक्रं वृहताद् अभीके ॥ ४ ०१६ १२
त्वम् पिप्रुम् मृगयं शूशुवांसम् ऋजिश्वने वैदथिनाय रन्धीः ।
पञ्चाशत् कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः ॥ ४ ०१६ १३
सूर उपाके तन्वं दधानो वि यत् ते चेत्य् अमृतस्य वर्पः ।
मृगो न हस्ती तविषीम् उषाणः सिंहो न भीम आयुधानि बिभ्रत् ॥ ४ ०१६ १४
इन्द्रं कामा वसूयन्तो अग्मन् स्वर्मीळ्हे न सवने चकानाः ।
श्रवस्यवः शशमानास उक्थैर् ओको न रण्वा सुदृशीव पुष्टिः ॥ ४ ०१६ १५
तम् इद् व इन्द्रं सुहवं हुवेम यस् ता चकार नर्या पुरूणि ।
यो मावते जरित्रे गध्यं चिन् मक्षू वाजम् भरति स्पार्हराधाः ॥ ४ ०१६ १६
तिग्मा यद् अन्तर् अशनिः पताति कस्मिञ् चिच् छूर मुहुके जनानाम् ।
घोरा यद् अर्य समृतिर् भवात्य् अध स्मा नस् तन्वो बोधि गोपाः ॥ ४ ०१६ १७
भुवो ऽविता वामदेवस्य धीनाम् भुवः सखावृको वाजसातौ ।
त्वाम् अनु प्रमतिम् आ जगन्मोरुशंसो जरित्रे विश्वध स्याः ॥ ४ ०१६ १८
एभिर् नृभिर् इन्द्र त्वायुभिष् ट्वा मघवद्भिर् मघवन् विश्व आजौ ।
द्यावो न द्युम्नैर् अभि सन्तो अर्यः क्षपो मदेम शरदश् च पूर्वीः ॥ ४ ०१६ १९
एवेद् इन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम् ।
नू चिद् यथा नः सख्या वियोषद् असन् न उग्रो ऽविता तनूपाः ॥ ४ ०१६ २०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०१६ २१

(३१३)
त्वम् महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रम् मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान् सृजः सिन्धूंर् अहिना जग्रसानान् ॥ ४ ०१७ ०१
तव त्विषो जनिमन् रेजत द्यौ रेजद् भूमिर् भियसा स्वस्य मन्योः ।
ऋघायन्त सुभ्व ऽः पर्वतास आर्दन् धन्वानि सरयन्त आपः ॥ ४ ०१७ ०२
भिनद् गिरिं शवसा वज्रम् इष्णन्न् आविष्कृण्वानः सहसान ओजः ।
वधीद् वृत्रं वज्रेण मन्दसानः सरन्न् आपो जवसा हतवृष्णीः ॥ ४ ०१७ ०३
सुवीरस् ते जनिता मन्यत द्यौर् इन्द्रस्य कर्ता स्वपस्तमो भूत् ।
य ईं जजान स्वर्यं सुवज्रम् अनपच्युतं सदसो न भूम ॥ ४ ०१७ ०४
य एक इच् च्यावयति प्र भूमा राजा कृष्टीनाम् पुरुहूत इन्द्रः ।
सत्यम् एनम् अनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः ॥ ४ ०१७ ०५
सत्रा सोमा अभवन्न् अस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः ।
सत्राभवो वसुपतिर् वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः ॥ ४ ०१७ ०६
त्वम् अध प्रथमं जायमानो ऽमे विश्वा अधिथा इन्द्र कृष्टीः ।
त्वम् प्रति प्रवत आशयानम् अहिं वज्रेण मघवन् वि वृश्चः ॥ ४ ०१७ ०७
सत्राहणं दाधृषिं तुम्रम् इन्द्रम् महाम् अपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ४ ०१७ ०८
अयं वृतश् चातयते समीचीर् य आजिषु मघवा शृण्व एकः ।
अयं वाजम् भरति यं सनोत्य् अस्य प्रियासः सख्ये स्याम ॥ ४ ०१७ ०९
अयं शृण्वे अध जयन्न् उत घ्नन्न् अयम् उत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युम् इन्द्रो विश्वं दृळ्हम् भयत एजद् अस्मात् ॥ ४ ०१७ १०
सम् इन्द्रो गा अजयत् सं हिरण्या सम् अश्विया मघवा यो ह पूर्वीः ।
एभिर् नृभिर् नृतमो अस्य शाकै रायो विभक्ता सम्भरश् च वस्वः ॥ ४ ०१७ ११
कियत् स्विद् इन्द्रो अध्य् एति मातुः कियत् पितुर् जनितुर् यो जजान ।
यो अस्य शुष्मम् मुहुकैर् इयर्ति वातो न जूत स्तनयद्भिर् अभ्रैः ॥ ४ ०१७ १२
क्षियन्तं त्वम् अक्षियन्तं कृणोतीयर्ति रेणुम् मघवा समोहम् ।
विभञ्जनुर् अशनिमाँ इव द्यौर् उत स्तोतारम् मघवा वसौ धात् ॥ ४ ०१७ १३
अयं चक्रम् इषणत् सूर्यस्य न्य् एतशं रीरमत् ससृमाणम् ।

आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ ॥ ४ ०१७ १४
असिक्न्यां यजमानो न होता ॥ ४ ०१७ १५
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।
जनीयन्तो जनिदाम् अक्षितोतिम् आ च्यावयामो ऽवते न कोशम् ॥ ४ ०१७ १६
त्राता नो बोधि ददृशान आपिर् अभिख्याता मर्डिता सोम्यानाम् ।
सखा पिता पितृतमः पितॄणां कर्तेम् उलोकम् उशते वयोधाः ॥ ४ ०१७ १७
सखीयताम् अविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः ।
वयं ह्य् आ ते चकृमा सबाध आभिः शमीभिर् महयन्त इन्द्र ॥ ४ ०१७ १८
स्तुत इन्द्रो मघवा यद् ध वृत्रा भूरीण्य् एको अप्रतीनि हन्ति ।
अस्य प्रियो जरिता यस्य शर्मन् नकिर् देवा वारयन्ते न मर्ताः ॥ ४ ०१७ १९
एवा न इन्द्रो मघवा विरप्शी करत् सत्या चर्षणीधृद् अनर्वा ।
त्वं राजा जनुषां धेह्य् अस्मे अधि श्रवो माहिनं यज् जरित्रे ॥ ४ ०१७ २०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०१७ २१

(३१४)
अयम् पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।
अतश् चिद् आ जनिषीष्ट प्रवृद्धो मा मातरम् अमुया पत्तवे कः ॥ ४ ०१८ ०१
नाहम् अतो निर् अया दुर्गहैतत् तिरश्चता पार्श्वान् निर् गमाणि ।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥ ४ ०१८ ०२
परायतीम् मातरम् अन्व् अचष्ट न नानु गान्य् अनु नू गमानि ।
त्वष्टुर् गृहे अपिबत् सोमम् इन्द्रः शतधन्यं चम्वोः सुतस्य ॥ ४ ०१८ ०३
किं स ऋधक् कृणवद् यं सहस्रम् मासो जभार शरदश् च पूर्वीः ।
नही न्व् अस्य प्रतिमानम् अस्त्य् अन्तर् जातेषूत ये जनित्वाः ॥ ४ ०१८ ०४
अवद्यम् इव मन्यमाना गुहाकर् इन्द्रम् माता वीर्येणा न्यृष्टम् ।
अथोद् अस्थात् स्वयम् अत्कं वसान आ रोदसी अपृणाज् जायमानः ॥ ४ ०१८ ०५
एता अर्षन्त्य् अललाभवन्तीर् ऋतावरीर् इव संक्रोशमानाः ।
एता वि पृच्छ किम् इदम् भनन्ति कम् आपो अद्रिम् परिधिं रुजन्ति ॥ ४ ०१८ ०६

किम् उ ष्विद् अस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः ।
ममैतान् पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद् वि सिन्धून् ॥ ४ ०१८ ०७
ममच् चन त्वा युवतिः परास ममच् चन त्वा कुषवा जगार ।
ममच् चिद् आपः शिशवे ममृड्युर् ममच् चिद् इन्द्रः सहसोद् अतिष्ठत् ॥ ४ ०१८ ०८
ममच् चन ते मघवन् व्यंसो निविविध्वाँ अप हनू जघान ।
अधा निविद्ध उत्तरो बभूवाञ् छिरो दासस्य सम् पिणक् वधेन ॥ ४ ०१८ ०९
गृष्टिः ससूव स्थविरं तवागाम् अनाधृष्यं वृषभं तुम्रम् इन्द्रम् ।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानम् ॥ ४ ०१८ १०
उत माता महिषम् अन्व् अवेनद् अमी त्वा जहति पुत्र देवाः ।
अथाब्रवीद् वृत्रम् इन्द्रो हनिष्यन् सखे विष्णो वितरं वि क्रमस्व ॥ ४ ०१८ ११
कस् ते मातरं विधवाम् अचक्रच् छयुं कस् त्वाम् अजिघांसच् चरन्तम् ।
कस् ते देवो अधि मार्डीक आसीद् यत् प्राक्षिणाः पितरम् पादगृह्य ॥ ४ ०१८ १२
अवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे मर्डितारम् ।
अपश्यं जायाम् अमहीयमानाम् अधा मे श्येनो मध्व् आ जभार ॥ ४ ०१८ १३

(३१५)
एवा त्वाम् इन्द्र वज्रिन्न् अत्र विश्वे देवासः सुहवास ऊमाः ।
महाम् उभे रोदसी वृद्धम् ऋष्वं निर् एकम् इद् वृणते वृत्रहत्ये ॥ ४ ०१९ ०१
अवासृजन्त जिव्रयो न देवा भुवः सम्राळ् इन्द्र सत्ययोनिः ।
अहन्न् अहिम् परिशयानम् अर्णः प्र वर्तनीर् अरदो विश्वधेनाः ॥ ४ ०१९ ०२
अतृप्णुवन्तं वियतम् अबुध्यम् अबुध्यमानं सुषुपाणम् इन्द्र ।
सप्त प्रति प्रवत आशयानम् अहिं वज्रेण वि रिणा अपर्वन् ॥ ४ ०१९ ०३
अक्षोदयच् छवसा क्षाम बुध्नं वार् ण वातस् तविषीभिर् इन्द्रः ।
दृळ्हान्य् औभ्नाद् उशमान ओजो ऽवाभिनत् ककुभः पर्वतानाम् ॥ ४ ०१९ ०४
अभि प्र दद्रुर् जनयो न गर्भं रथा इव प्र ययुः साकम् अद्रयः ।
अतर्पयो विसृत उब्ज ऊर्मीन् त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥ ४ ०१९ ०५
त्वम् महीम् अवनिं विश्वधेनां तुर्वीतये वय्याय क्षरन्तीम् ।

अरमयो नमसैजद् अर्णः सुतरणाँअकृणोर् इन्द्र सिन्धून् ॥ ४ ०१९ ०६
प्राग्रुवो नभन्वो ३ न वक्वा ध्वस्रा अपिन्वद् युवतीर् ऋतज्ञाः ।
धन्वान्य् अज्राँअपृणक् तृषाणाँअधोग् इन्द्र स्तर्यो ३ दंसुपत्नीः ॥ ४ ०१९ ०७
पूर्वीर् उषसः शरदश् च गूर्ता वृत्रं जघन्वाँअसृजद् वि सिन्धून् ।
परिष्ठिता अतृणद् बद्बधानाः सीरा इन्द्रः स्रवितवे पृथिव्या ॥ ४ ०१९ ०८
वम्रीभिः पुत्रम् अग्रुवो अदानं निवेशनाद् धरिव आ जभर्थ ।
व्य् अ १ न्धो अख्यद् अहिम् आददानो निर् भूद् उखच्छित् सम् अरन्त पर्व ॥ ४
०१९ ०९
प्र ते पूर्वाणि करणानि विप्राविद्वाँआह विदुषे करांसि ।
यथा-यथा वृष्ण्यानि स्वगूर्तापांसि राजन् नर्याविवेषीः ॥ ४ ०१९ १०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो ३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०१९ ११

(३१६)
आ न इन्द्रो दूराद् आ न आसाद् अभिष्टिकृद् अवसे यासद् उग्रः ।
ओजिष्ठेभिर् नृपतिर् वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥ ४ ०२० ०१
आ न इन्द्रो हरिभिर् यात्व् अच्छार्वाचीनो ऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञम् अनु नो वाजसातौ ॥ ४ ०२० ०२
इमं यज्ञं त्वम् अस्माकम् इन्द्र पुरो दधत् सनिष्यसि क्रतुं नः ।
श्वघ्नीव वज्रिन् सनये धनानां त्वया वयम् अर्य आजिं जयेम ॥ ४ ०२० ०३
उशन्न् उ षु णः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः ।
पा इन्द्र प्रतिभृतस्य मध्वः सम् अन्धसा ममदः पृष्ठ्येन ॥ ४ ०२० ०४
वि यो ररप्श ऋषिभिर् नवेभिर् वृक्षो न पक्वः सृण्यो न जेता ।
मर्यो न योषाम् अभि मन्यमानो ऽच्छा विवक्मि पुरुहूतम् इन्द्रम् ॥ ४ ०२० ०५
गिरिर् न यः स्वतवाँऋष्व इन्द्रः सनाद् एव सहसे जात उग्रः ।
आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टम् ॥ ४ ०२० ०६
न यस्य वर्ता जनुषा न्व् अस्ति न राधस आमरीता मघस्य ।

उद्वावृषाणस् तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः ॥ ४ ०२० ०७
ईक्षे रायः क्षयस्य चर्षणीनाम् उत व्रजम् अपवर्तासि गोनाम् ।
शिक्षानरः समिथेषु प्रहावान् वस्वो राशिम् अभिनेतासि भूरिम् ॥ ४ ०२० ०८
कया तच् छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिद् ऋष्वः ।
पुरु दाशुषे विचयिष्ठो अंहो ऽथा दधाति द्रविणं जरित्रे ॥ ४ ०२० ०९
मा नो मर्धीर् आ भरा दद्धि तन् नः प्र दाशुषे दातवे भूरि यत् ते ।
नव्ये देष्णे शस्ते अस्मिन् त उक्थे प्र ब्रवाम वयम् इन्द्र स्तुवन्तः ॥ ४ ०२० १०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो ३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०२० ११

(३१७)
आ यात्व् इन्द्रो ऽवस उप न इह स्तुतः सधमाद् अस्तु शूरः ।
वावृधानस् तविषीर् यस्य पूर्वीर् द्यौर् न क्षत्रम् अभिभूति पुष्यात् ॥ ४ ०२१ ०१
तस्येद् इह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄन् ।
यस्य क्रतुर् विदथ्यो ३ न सम्राट् साह्वान् तरुत्रो अभ्य् अस्ति कृष्टीः ॥ ४ ०२१ ०२
आ यात्व् इन्द्रो दिव आ पृथिव्या मक्षू समुद्राद् उत वा पुरीषात् ।
स्वर्णराद् अवसे नो मरुत्वान् परावतो वा सदनाद् ऋतस्य ॥ ४ ०२१ ०३
स्थूरस्य रायो बृहतो य ईशे तम् उ ष्टवाम विदथेष्व् इन्द्रम् ।
यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ ॥ ४ ०२१ ०४
उप यो नमो नमसि स्तभायन्न् इयर्ति वाचं जनयन् यजध्यै ।
ऋञ्जसानः पुरुवार उक्थैर् एन्द्रं कृण्वीत सदनेषु होता ॥ ४ ०२१ ०५
धिषा यदि धिषण्यन्तः सरण्यान् सदन्तो अद्रिम् औशिजस्य गोहे ।
आ दुरोषाः पास्त्यस्य होता यो नो महान् संवरणेषु वह्निः ॥ ४ ०२१ ०६
सत्रा यद् ईम् भार्वरस्य वृष्णः सिषक्ति शुष्मः स्तुवते भराय ।
गुहा यद् ईम् औशिजस्य गोहे प्र यद् धिये प्रायसे मदाय ॥ ४ ०२१ ०७
वि यद् वरांसि पर्वतस्य वृण्वे पयोभिर् जिन्वे अपां जवांसि ।
विदद् गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो ३ वहन्ति ॥ ४ ०२१ ०८

भद्रा ते हस्ता सुकृतोत पाणी प्रयन्तारा स्तुवते राध इन्द्र ।
का ते निषत्तिः किम् उ नो ममत्सि किं नोद्-उद् उ हर्षसे दातवा उ ॥ ४ ०२१ ०९
एवा वस्व इन्द्रः सत्यः सम्राड् ढन्ता वृत्रं वरिवः पूरवे कः ।
पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय ते ऽवसो दैव्यस्य ॥ ४ ०२१ १०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०२१ ११

(३१८)
यन् न इन्द्रो जुजुषे यच् च वष्टि तन् नो महान् करति शुष्म्य् आ चित् ।
ब्रह्म स्तोमम् मघवा सोमम् उक्था यो अश्मानं शवसा बिभ्रद् एति ॥ ४ ०२२ ०१
वृषा वृषन्धिं चतुरश्रिम् अस्यन्न् उग्रो बाहुभ्यां नृतमः शचीवान् ।
श्रिये परुष्णीम् उषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये ॥ ४ ०२२ ०२
यो देवो देवतमो जायमानो महो वाजेभिर् महद्भिश् च शुष्मैः ।
दधानो वज्रम् बाह्वोर् उशन्तं द्याम् अमेन रेजयत् प्र भूम ॥ ४ ०२२ ०३
विश्वा रोधांसि प्रवतश् च पूर्वीर् द्यौर् ऋष्वाज् जनिमन् रेजत क्षाः ।
आ मातरा भरति शुष्म्य् आ गोर् नृवत् परिज्मन् नोनुवन्त वाताः ॥ ४ ०२२ ०४
ता तू त इन्द्र महतो महानि विश्वेष्व् इत् सवनेषु प्रवाच्या ।
यच् छूर धृष्णो धृषता दधृष्वान् अहिं वज्रेण शवसाविवेषीः ॥ ४ ०२२ ०५
ता तू ते सत्या तुविनृम्ण विश्वा प्र धेनवः सिस्रते वृष्ण ऊध्नः ।
अधा ह त्वद् वृषमणो भियानाः प्र सिन्धवो जवसा चक्रमन्त ॥ ४ ०२२ ०६
अत्राह ते हरिवस् ता उ देवीर् अवोभिर् इन्द्र स्तवन्त स्वसारः ।
यत् सीम् अनु प्र मुचो बद्बधाना दीर्घाम् अनु प्रसितिं स्यन्दयध्यै ॥ ४ ०२२ ०७
पिपीळे अंशुर् मद्यो न सिन्धुर् आ त्वा शमी शशमानस्य शक्तिः ।
अस्मद्र्यक् छुशुचानस्य यम्या आशुर् न रश्मिं तुव्योजसं गोः ॥ ४ ०२२ ०८
अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि ।
अस्मभ्यं वृत्रा सुहनानि रन्धि जहि वधर् वनुषो मर्त्यस्य ॥ ४ ०२२ ०९
अस्माकम् इत् सु शृणुहि त्वम् इन्द्रास्मभ्यं चित्राँ उप माहि वाजान् ।

अस्मभ्यं विश्वा इषणः पुरंधीर् अस्माकं सु मघवन् बोधि गोदाः ॥ ४ ०२२ १०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०२२ ११

(३१९)
कथा महाम् अवृधत् कस्य होतुर् यज्ञं जुषाणो अभि सोमम् ऊधः ।
पिबन्न् उशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय ॥ ४ ०२३ ०१
को अस्य वीरः सधमादम् आप सम् आनंश सुमतिभिः को अस्य ।
कद् अस्य चित्रं चिकिते कद् ऊती वृधे भुवच् छशमानस्य यज्योः ॥ ४ ०२३ ०२
कथा शृणोति हूयमानम् इन्द्रः कथा शृण्वन्न् अवसाम् अस्य वेद ।
का अस्य पूर्वीर् उपमातयो ह कथैनम् आहुः पपुरिं जरित्रे ॥ ४ ०२३ ०३
कथा सबाधः शशमानो अस्य नशद् अभि द्रविणं दीध्यानः ।
देवो भुवन् नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज् जुजोषत् ॥ ४ ०२३ ०४
कथा कद् अस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष ।
कथा कद् अस्य सख्यं सखिभ्यो ये अस्मिन् कामं सुयुजं ततस्रे ॥ ४ ०२३ ०५
किम् आद् अमत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रम् प्र ब्रवाम ।
श्रिये सुदृशो वपुर् अस्य सर्गाः स्व र् ण चित्रतमम् इष आ गोः ॥ ४ ०२३ ०६
द्रुहं जिघांसन् ध्वरसम् अनिन्द्रां तेतिक्ते तिग्मा तुजसे अनीका ।
ऋणा चिद् यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे ॥ ४ ०२३ ०७
ऋतस्य हि शुरुधः सन्ति पूर्वीर् ऋतस्य धीतिर् वृजिनानि हन्ति ।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः ॥ ४ ०२३ ०८
ऋतस्य दृळ्हा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि ।
ऋतेन दीर्घम् इषणन्त पृक्ष ऋतेन गाव ऋतम् आ विवेशुः ॥ ४ ०२३ ०९
ऋतं येमान ऋतम् इद् वनोत्य् ऋतस्य शुष्मस् तुरया उ गव्युः ।
ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते ॥ ४ ०२३ १०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०२३ ११

(३२०)

का सुष्टुतिः शवसः सूनुम् इन्द्रम् अर्वाचीनं राधस आ ववर्तत् ।
ददिर् हि वीरो गृणते वसूनि स गोपतिर् निष्षिधां नो जनासः ॥ ४ ०२४ ०१
स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इन्द्रः सत्यराधाः ।
स यामन्न् आ मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात् ॥ ४ ०२४ ०२
तम् इन् नरो वि ह्वयन्ते समीके रिरिक्वांसस् तन्वः कृण्वत त्राम् ।
मिथो यत् त्यागम् उभयासो अग्मन् नरस् तोकस्य तनयस्य सातौ ॥ ४ ०२४ ०३
क्रतूयन्ति क्षितयो योग उग्राशुषाणासो मिथो अर्णसातौ ।
सं यद् विशो ऽववृत्रन्त युध्मा आद् इन् नेम इन्द्रयन्ते अभीके ॥ ४ ०२४ ०४
आद् इद् ध नेम इन्द्रियं यजन्त आद् इत् पक्तिः पुरोळाशं रिरिच्यात् ।
आद् इत् सोमो वि पपृच्याद् असुष्वीन् आद् इज् जुजोष वृषभं यजध्यै ॥ ४ ०२४
०५
कृणोत्य् अस्मै वरिवो य इत्थेन्द्राय सोमम् उशते सुनोति ।
सध्रीचीनेन मनसाविवेनन् तम् इत् सखायं कृणुते समत्सु ॥ ४ ०२४ ०६
य इन्द्राय सुनवत् सोमम् अद्य पचात् पक्तीर् उत भृज्जाति धानाः ।
प्रति मनायोर् उचथानि हर्यन् तस्मिन् दधद् वृषणं शुष्मम् इन्द्रः ॥ ४ ०२४ ०७
यदा समर्यं व्य् अचेद् ऋघावा दीर्घं यद् आजिम् अभ्य् अख्यद् अर्यः ।
अचिक्रदद् वृषणम् पत्न्य् अच्छा दुरोण आ निशितं सोमसुद्भिः ॥ ४ ०२४ ०८
भूयसा वस्नम् अचरत् कनीयो ऽविक्रीतो अकानिषम् पुनर् यन् ।
स भूयसा कनीयो नारिरेचीद् दीना दक्षा वि दुहन्ति प्र वाणम् ॥ ४ ०२४ ०९
क इमं दशभिर् ममेन्द्रं क्रीणाति धेनुभिः ।
यदा वृत्राणि जङ्घनद् अथैनम् मे पुनर् ददत् ॥ ४ ०२४ १०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ४ ०२४ ११

(३२१)

को अद्य नर्यो देवकाम उशन्न् इन्द्रस्य सख्यं जुजोष ।
को वा महे ऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥ ४ ०२५ ०१
को नानाम वचसा सोम्याय मनायुर् वा भवति वस्त उस्राः ।
क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥ ४ ०२५ ०२
को देवानाम् अवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिर् ईट्टे ।
कस्याश्विनाव् इन्द्रो अग्निः सुतस्यांशोः पिबन्ति मनसाविवेनम् ॥ ४ ०२५ ०३
तस्मा अग्निर् भारतः शर्म यंसज् ज्योक् पश्यात् सूर्यम् उच्चरन्तम् ।
य इन्द्राय सुनवामेत्य् आह नरे नर्याय नृतमाय नृणाम् ॥ ४ ०२५ ०४
न तं जिनन्ति बहवो न दभ्रा उर्व् अस्मा अदितिः शर्म यंसत् ।
प्रियः सुकृत् प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥ ४ ०२५ ०५
सुप्राव्यः प्राशुषाळ् एष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः ।
नासुष्वेर् आपिर् न सखा न जामिर् दुष्प्राव्यो ऽवहन्तेद् अवाचः ॥ ४ ०२५ ०६
न रेवता पणिना सख्यम् इन्द्रो ऽसुन्वता सुतपाः सं गृणीते ।
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥ ४ ०२५ ०७
इन्द्रम् परे ऽवरे मध्यमास इन्द्रं यान्तो ऽवसितास इन्द्रम् ।
इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते ॥ ४ ०२५ ०८

(३२२)

अहम् मनुर् अभवं सूर्यश् चाहं कक्षीवाँ ऋषिर् अस्मि विप्रः ।
अहं कुत्सम् आर्जुनेयं न्य् ऋञ्जे ऽहं कविर् उशना पश्यता मा ॥ ४ ०२६ ०१
अहम् भूमिम् अददाम् आर्यायाहं वृष्टिं दाशुषे मर्त्याय ।
अहम् अपो अनयं वावशाना मम देवासो अनु केतम् आयन् ॥ ४ ०२६ ०२
अहम् पुरो मन्दसानो व्य् आइरं नव साकं नवतीः शम्बरस्य ।
शततमं वेश्यं सर्वताता दिवोदासम् अतिथिग्वं यद् आवम् ॥ ४ ०२६ ०३
प्र सु ष विभ्यो मरुतो विर् अस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।
अचक्रया यत् स्वधया सुपर्णो हव्यम् भरन् मनवे देवजुष्टम् ॥ ४ ०२६ ०४

भरद् यदि विर् अतो वेविजानः पथोरुणा मनोजवा असर्जि ।
तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥ ४ ०२६ ०५
ऋजीपी श्येनो ददमानो अंशुम् परावतः शकुनो मन्द्रम् मदम् ।
सोमम् भरद् दादृहाणो देवावान् दिवो अमुष्माद् उत्तराद् आदाय ॥ ४ ०२६ ०६
आदाय श्येनो अभरत् सोमं सहस्रं सवाँ अयुतं च साकम् ।
अत्रा पुरंधिर् अजहाद् अरातीर् मदे सोमस्य मूरा अमूरः ॥ ४ ०२६ ०७

(३२३)
गर्भे नु सन्न् अन्व् एषाम् अवेदम् अहं देवानां जनिमानि विश्वा ।
शतम् मा पुर आयसीर् अरक्षन्न् अध श्येनो जवसा निर् अदीयम् ॥ ४ ०२७ ०१
न घा स माम् अप जोषं जभाराभीम् आस त्वक्षसा वीर्येण ।
ईर्मा पुरंधिर् अजहाद् अरातीर् उत वाताँ अतरच् छूशुवानः ॥ ४ ०२७ ०२
अव यच् छ्येनो अस्वनीद् अध द्योर् वि यद् यदि वात ऊहुः पुरंधिम् ।
सृजद् यद् अस्मा अव ह क्षिपज् ज्यां कृशानुर् अस्ता मनसा भुरण्यन् ॥ ४ ०२७ ०३
ऋजिप्य ईम् इन्द्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः ।
अन्तः पतत् पतत्र्य् अस्य पर्णम् अध यामनि प्रसितस्य तद् वेः ॥ ४ ०२७ ०४
अध श्वेतं कलशं गोभिर् अक्तम् आपिप्यानम् मघवा शुक्रम् अन्धः ।
अध्वर्युभिः प्रयतम् मध्वो अग्रम् इन्द्रो मदाय प्रति धत् पिबध्यै शूरो मदाय प्रति धत् पिबध्यै ॥ ।

(३२४)
त्वा युजा तव तत् सोम सख्य इन्द्रो अपो मनवे सस्रुतस् कः ।
अहन्न् अहिम् अरिणात् सप्त सिन्धून् अपावृणोद् अपिहितेव खानि ॥ ४ ०२८ ०१
त्वा युजा नि खिदत् सूर्यस्येन्द्रश् चक्रं सहसा सद्य इन्दो ।
अधि ष्णुना बृहता वर्तमानम् महो द्रुहो अप विश्वायु धायि ॥ ४ ०२८ ०२
अहन्न् इन्द्रो अदहद् अग्निर् इन्दो पुरा दस्यून् मध्यंदिनाद् अभीके ।
दुर्गे दुरोणे क्रत्वा न याताम् पुरू सहस्रा शर्वा नि बर्हीत् ॥ ४ ०२८ ०३

विश्वस्मात् सीम् अधमाँ इन्द्र दस्यून् विशो दासीर् अकृणोर् अप्रशस्ताः ।
अबाधेथाम् अमृणतं नि शत्रून् अविन्देथाम् अपचितिं वधत्रैः ॥ ४ ०२८ ०४
एवा सत्यम् मघवाना युवं तद् इन्द्रश् च सोमोर्वम् अश्व्यं गोः ।
आदर्दृतम् अपिहितान्य् अश्ना रिरिचथुः क्षाश् चित् ततृदाना ॥ ४ ०२८ ०५

(३२५)
आ न स्तुत उप वाजेभिर् ऊती इन्द्र याहि हरिभिर् मन्दसानः ।
तिरश् चिद् अर्यः सवना पुरूण्य् आङ्गूषेभिर् गृणानः सत्यराधाः ॥ ४ ०२९ ०१
आ हि ष्मा याति नर्यश् चिकित्वान् हूयमानः सोतृभिर् उप यज्ञम् ।
स्वश्वो यो अभीरुर् मन्यमानः सुष्वाणेभिर् मदति सं ह वीरैः ॥ ४ ०२९ ०२
श्रावयेद् अस्य कर्णा वाजयध्यै जुष्टाम् अनु प्र दिशम् मन्दयध्यै ।
उद्वावृषाणो राधसे तुविष्मान् करन् न इन्द्रः सुतीर्थाभयं च ॥ ४ ०२९ ०३
अच्छा यो गन्ता नाधमानम् ऊती इत्था विप्रं हवमानं गृणन्तम् ।
उप त्मनि दधानो धुर्य् आ३ंशून् सहस्राणि शतानि वज्रबाहुः ॥ ४ ०२९ ०४
त्वोतासो मघवन्न् इन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः ।
भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥ ४ ०२९ ०५

(३२६)
नकिर् इन्द्र त्वद् उत्तरो न ज्यायाँ अस्ति वृत्रहन् ।
नकिर् एवा यथा त्वम् ॥ ४ ०३० ०१
सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः ।
सत्रा महाँ असि श्रुतः ॥ ४ ०३० ०२
विश्वे चनेद् अना त्वा देवास इन्द्र युयुधुः ।
यद् अहा नक्तम् आतिरः ॥ ४ ०३० ०३
यत्रोत बाधितेभ्यश् चक्रं कुत्साय युध्यते ।
मुषाय इन्द्र सूर्यम् ॥ ४ ०३० ०४

यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत् ।
त्वम् इन्द्र वनूँर् अहन् ॥ ४ ०३० ०५
यत्रोत मर्त्याय कम् अरिणा इन्द्र सूर्यम् ।
प्रावः शचीभिर् एतशम् ॥ ४ ०३० ०६
किम् आद् उतासि वृत्रहन् मघवन् मन्युमत्तमः ।
अत्राह दानुम् आतिरः ॥ ४ ०३० ०७
एतद् घेद् उत वीर्यम् इन्द्र चकर्थ पौंस्यम् ।
स्त्रियं यद् दुर्हणायुवं वधीर् दुहितरं दिवः ॥ ४ ०३० ०८
दिवश् चिद् घा दुहितरम् महान् महीयमानाम् ।
उषासम् इन्द्र सम् पिणक् ॥ ४ ०३० ०९
अपोषा अनसः सरत् सम्पिष्टाद् अह बिभ्युषी ।
नि यत् सीं शिश्नथद् वृषा ॥ ४ ०३० १०
एतद् अस्या अनः शये सुसम्पिष्टं विपाश्य् आ ।
ससार सीम् परावतः ॥ ४ ०३० ११
उत सिन्धुं विबाल्यं वितस्थानाम् अधि क्षमि ।
परि ष्ठा इन्द्र मायया ॥ ४ ०३० १२
उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम् ।
पुरो यद् अस्य सम्पिणक् ॥ ४ ०३० १३
उत दासं कौलितरम् बृहतः पर्वताद् अधि ।
अवाहन्न् इन्द्र शम्बरम् ॥ ४ ०३० १४
उत दासस्य वर्चिनः सहस्राणि शतावधीः ।
अधि पञ्च प्रधीँर् इव ॥ ४ ०३० १५
उत त्यम् पुत्रम् अग्रुवः परावृक्तं शतक्रतुः ।
उक्थेष्व् इन्द्र आभजत् ॥ ४ ०३० १६
उत त्या तुर्वशायदू अस्नातारा शचीपतिः ।
इन्द्रो विद्वाँ अपारयत् ॥ ४ ०३० १७
उत त्या सद्य आर्या सरयोर् इन्द्र पारतः ।
अर्णाचित्ररथावधीः ॥ ४ ०३० १८

अनु द्वा जहिता नयो ऽन्धं श्रोणं च वृत्रहन् ।
न तत् ते सुम्नम् अष्टवे ॥ ४ ०३० १९
शतम् अश्मन्मयीनाम् पुराम् इन्द्रो व्य् आस्यत् ।
दिवोदासाय दाशुषे ॥ ४ ०३० २०
अस्वापयद् दभीतये सहस्रा त्रिंशतं हथैः ।
दासानाम् इन्द्रो मायया ॥ ४ ०३० २१
स घेद् उतासि वृत्रहन् समान इन्द्र गोपतिः ।
यस् ता विश्वानि चिच्युषे ॥ ४ ०३० २२
उत नूनं यद् इन्द्रियं करिष्या इन्द्र पौंस्यम् ।
अद्या नकिष् टद् आ मिनत् ॥ ४ ०३० २३
वामं-वामं त आदुरे देवो ददात्व् अर्यमा ।
वामम् पूषा वामम् भगो वामं देवः करूळती ॥ ४ ०३० २४

(३२७)
कया नश् चित्र आ भुवद् ऊती सदावृधः सखा ।
कया शचिष्ठया वृता ॥ ४ ०३१ ०१
कस् त्वा सत्यो मदानाम् मंहिष्ठो मत्सद् अन्धसः ।
दृळ्हा चिद् आरुजे वसु ॥ ४ ०३१ ०२
अभी षु णः सखीनाम् अविता जरितॄणाम् ।
शतम् भवास्य् ऊतिभिः ॥ ४ ०३१ ०३
अभी न आ ववृत्स्व चक्रं न वृत्तम् अर्वतः ।
नियुद्भिश् चर्षणीनाम् ॥ ४ ०३१ ०४
प्रवता हि क्रतूनाम् आ हा पदेव गच्छसि ।
अभक्षि सूर्ये सचा ॥ ४ ०३१ ०५
सं यत् त इन्द्र मन्यवः सं चक्राणि दधन्विरे ।
अध त्वे अध सूर्ये ॥ ४ ०३१ ०६
उत स्मा हि त्वाम् आहुर् इन् मघवानं शचीपते ।

दातारम् अविदीधयुम् ॥ ४ ०३१ ०७
उत स्मा सद्य इत् परि शशमानाय सुन्वते ।
पुरू चिन् मंहसे वसु ॥ ४ ०३१ ०८
नहि ष्मा ते शतं चन राधो वरन्त आमुरः ।
न च्यौत्नानि करिष्यतः ॥ ४ ०३१ ०९
अस्माँ अवन्तु ते शतम् अस्मान् सहस्रम् ऊतयः ।
अस्मान् विश्वा अभिष्टयः ॥ ४ ०३१ १०
अस्माँ इहा वृणीष्व सख्याय स्वस्तये ।
महो राये दिवित्मते ॥ ४ ०३१ ११
अस्माँ अविड्ढि विश्वहेन्द्र राया परीणसा ।
अस्मान् विश्वाभिर् ऊतिभिः ॥ ४ ०३१ १२
अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः ।
नवाभिर् इन्द्रोतिभिः ॥ ४ ०३१ १३
अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः ।
गव्युर् अश्वयुर् ईयते ॥ ४ ०३१ १४
अस्माकम् उत्तमं कृधि श्रवो देवेषु सूर्य ।
वर्षिष्ठं द्याम् इवोपरि ॥ ४ ०३१ १५

(३२८)
आ तू न इन्द्र वृत्रहन्न् अस्माकम् अर्धम् आ गहि ।
महान् महीभिर् ऊतिभिः ॥ ४ ०३२ ०१
भृमिश् चिद् घासि तूतुजिर् आ चित्र चित्रिणीष्व् आ ।
चित्रं कृणोष्य् ऊतये ॥ ४ ०३२ ०२
दभ्रेभिश् चिच् छशीयांसं हंसि व्राधन्तम् ओजसा ।
सखिभिर् ये त्वे सचा ॥ ४ ०३२ ०३
वयम् इन्द्र त्वे सचा वयं त्वाभि नोनुमः ।
अस्माँअस्माँ इद् उद् अव ॥ ४ ०३२ ०४

स नश् चित्राभिर् अद्रिवो ऽनवद्याभिर् ऊतिभिः ।
अनाधृष्टाभिर् आ गहि ॥ ४ ०३२ ०५
भूयामो षु त्वावतः सखाय इन्द्र गोमतः ।
युजो वाजाय घृष्वये ॥ ४ ०३२ ०६
त्वं ह्य् एक ईशिष इन्द्र वाजस्य गोमतः ।
स नो यन्धि महीम् इषम् ॥ ४ ०३२ ०७
न त्वा वरन्ते अन्यथा यद् दित्ससि स्तुतो मघम् ।
स्तोतृभ्य इन्द्र गिर्वणः ॥ ४ ०३२ ०८
अभि त्वा गोतमा गिरानूषत प्र दावने ।
इन्द्र वाजाय घृष्वये ॥ ४ ०३२ ०९
प्र ते वोचाम वीर्या ३ या मन्दसान आरुजः ।
पुरो दासीर् अभीत्य ॥ ४ ०३२ १०
ता ते गृणन्ति वेधसो यानि चकर्थ पौंस्या ।
सुतेष्व् इन्द्र गिर्वणः ॥ ४ ०३२ ११
अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः ।
ऐषु धा वीरवद् यशः ॥ ४ ०३२ १२
यच् चिद् धि शश्वताम् असीन्द्र साधारणस् त्वम् ।
तं त्वा वयं हवामहे ॥ ४ ०३२ १३
अर्वाचीनो वसो भवास्मे सु मत्स्वान्धसः ।
सोमानाम् इन्द्र सोमपाः ॥ ४ ०३२ १४
अस्माकं त्वा मतीनाम् आ स्तोम इन्द्र यच्छतु ।
अर्वाग् आ वर्तया हरी ॥ ४ ०३२ १५
पुरोळाशं च नो घसो जोषयासे गिरश् च नः ।
वधूयुर् इव योषणाम् ॥ ४ ०३२ १६
सहस्रं व्यतीनां युक्तानाम् इन्द्रम् ईमहे ।
शतं सोमस्य खार्यः ॥ ४ ०३२ १७
सहस्रा ते शता वयं गवाम् आ च्यावयामसि ।
अस्मत्रा राध एतु ते ॥ ४ ०३२ १८

दर्श॑ ते क॒लशा॑नां॒ हिर॑ण्यानाम् अधीमहि ।
भू॒रि॒दा अ॑सि वृत्रहन् ॥ ४ ०३२ १९
भूरि॑दा॒ भूरि॑ देहि नो॒ मा द॒भ्रम् भूर्य् आ भ॑र ।
भूरि॒ घेद् इ॑न्द्र दित्ससि ॥ ४ ०३२ २०
भू॒रि॒दा ह्य् असि॑ श्रु॒तः पु॑रु॒त्रा शू॑र वृत्रहन् ।
आ नो॑ भजस्व॒ राध॑सि ॥ ४ ०३२ २१
प्र ते॑ ब॒भ्रू वि॑चक्षण॒ शंसा॑मि गोषणो नपात् ।
माभ्यां॒ गा अनु॑ शिश्रथः ॥ ४ ०३२ २२
क॒नी॒न॒केव॑ विद्र॒धे नवे॑ द्रु॒प॒दे अ॑र्भ॒के ।
ब॒भ्रू यामे॑षु शोभेते ॥ ४ ०३२ २३
अर॑म् म उ॒स्रया॒म्णे ऽर॑म् अनु॒स्रयाम्णे ।
ब॒भ्रू यामे॑ष्व् अ॒स्रिधा॑ ॥ ४ ०३२ २४

(३२९)
प्र ऋ॒भुभ्यो॑ दू॒तम् इ॑व॒ वाच॑म् इष्य उप॒स्तिरे॒ श्वैत॑रीं धे॒नुम् ई॑ळे ।
ये वात॑जूतास् त॒रणि॑भिर् ए॒वैः परि॒ द्यां स॒द्यो अ॒पसो॑ बभू॒वुः ॥ ४ ०३३ ०१
य॒दा॒रम् अक्र॑न्न् ऋ॒भवः॑ पि॒तृभ्या॒म् परि॑विष्टी वे॒षणा॑ दं॒सना॑भिः ।
आद् इद् दे॒वाना॒म् उप॑ स॒ख्यम् आ॑यन् धीरा॑सः पु॒ष्टिम् अ॑वहन् म॒नायै॑ ॥ ४ ०३३ ०२
पु॒नर् ये च॒क्रुः पि॒तरा॒ युवा॑ना॒ सना॒ यूपे॑व ज॒रणा शया॑ना ।
ते वाजो॒ विभ्वाँ॑ ऋ॒भुर् इन्द्र॑वन्तो॒ मधु॑प्सरसो नो ऽवन्तु य॒ज्ञम् ॥ ४ ०३३ ०३
यत् सं॒वत्स॑म् ऋ॒भवो॒ गाम् अर॑क्ष॒न् यत् सं॒वत्स॑म् ऋ॒भवो॒ मा अपिं॑शन् ।
यत् सं॒वत्स॒म् अभ॑र॒न् भासो॑ अस्या॒स् ताभि॒ः शमी॑भिर् अमृत॒त्वम् आ॑शुः ॥ ४ ०३३ ०४
ज्ये॒ष्ठ आ॑ह चम॒सा द्वा क॒रेति॒ कनी॑या॒न् त्रीन् कृ॑णवा॒मेत्य् आ॑ह ।
क॒नि॒ष्ठ आ॑ह च॒तुर॑स् क॒रेति॒ त्वष्ट॑ ऋभव॒स् तत् प॑नय॒द् वचो॑ वः ॥ ४ ०३३ ०५
स॒त्यम् ऊ॑चु॒र् नर॑ ए॒वा हि च॒क्रुर् अनु॑ स्व॒धाम् ऋ॒भवो॑ जग्मु॒र् ए॒ताम् ।
वि॒भ्राज॑मानांश् चम॒साँ॒ अहे॒वावे॑न॒त् त्वष्टा॑ च॒तुरो॑ ददृ॒श्वान् ॥ ४ ०३३ ०६

द्वादश द्यून् यद् अगोह्यस्यातिथ्ये रणन्न् ऋभवः ससन्तः ।
सुक्षेत्राकृण्वन्न् अनयन्त सिन्धून् धन्वातिष्ठन्न् ओषधीर् निम्नम् आपः ॥ ४ ०३३ ०७
रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् ।
त आ तक्षन्त्व् ऋभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥ ४ ०३३ ०८
अपो ह्य् एषाम् अजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः ।
वाजो देवानाम् अभवत् सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥ ४ ०३३ ०९
ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस् पोषं द्रविणान्य् अस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥ ४ ०३३ १०
इदाह्नः पीतिम् उत वो मदं धुर् न ऋते श्रान्तस्य सख्याय देवाः ।
ते नूनम् अस्मे ऋभवो वसूनि तृतीये अस्मिन् सवने दधात ॥ ४ ०३३ ११

(३३०)
ऋभुर् विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात ।
इदा हि वो धिषणा देव्य् अह्नाम् अधात् पीतिं सम् मदा अग्मता वः ॥ ४ ०३४ ०१
विदानासो जन्मनो वाजरत्ना उत ऋतुभिर् ऋभवो मादयध्वम् ।
सं वो मदा अग्मत सम् पुरंधिः सुवीराम् अस्मे रयिम् एरयध्वम् ॥ ४ ०३४ ०२
अयं वो यज्ञ ऋभवो ऽकारि यम् आ मनुष्वत् प्रदिवो दधिध्वे ।
प्र वो ऽच्छा जुजुषाणासो अस्थुर् अभूत विश्वे अग्रियोत वाजाः ॥ ४ ०३४ ०३
अभूद् उ वो विधते रत्नधेयम् इदा नरो दाशुषे मर्त्याय ।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनम् मदाय ॥ ४ ०३४ ०४
आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः ।
आ वः पीतयो ऽभिपित्वे अह्नाम् इमा अस्तं नवस्व इव ग्मन् ॥ ४ ०३४ ०५
आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।
सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः ॥ ४ ०३४ ०६
सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रेपाभिर् ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥ ४ ०३४ ०७
सजोषस आदित्यैर् मादयध्वं सजोषस ऋभवः पर्वतेभिः ।

सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ॥ ४ ०३४ ०८
ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर् ऋभवो ये अश्वा ।
ये अंसत्रा य ऋधग् रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥ ४ ०३४ ०९
ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तम् पुरुक्षुम् ।
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ॥ ४ ०३४ १०
नापाभूत न वो ऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ।
सम् इन्द्रेण मदथ सम् मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥ ४ ०३४ ११

(३३१)
इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत ।
अस्मिन् हि वः सवने रत्नधेयं गमन्त्व् इन्द्रम् अनु वो मदासः ॥ ४ ०३५ ०१
आगन्न् ऋभूणाम् इह रत्नधेयम् अभूत् सोमस्य सुषुतस्य पीतिः ।
सुकृत्यया यत् स्वपस्यया चꣳएकं विचक्र चमसं चतुर्धा ॥ ४ ०३५ ०२
व्य् अकृणोत चमसं चतुर्धा सखे वि शिक्षेत्य् अब्रवीत ।
अथैत वाजा अमृतस्य पन्थां गणं देवानाम् ऋभवः सुहस्ताः ॥ ४ ०३५ ०३
किम्मयः स्विच् चमस एष आस यं काव्येन चतुरो विचक्र ।
अथा सुनुध्वं सवनम् मदाय पात ऋभवो मधुनः सोम्यस्य ॥ ४ ०३५ ०४
शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम् ।
शच्या हरी धनुतराव् अतष्टेन्द्रवाहाव् ऋभवो वाजरत्नाः ॥ ४ ०३५ ०५
यो वः सुनोत्य् अभिपित्वे अह्नां तीव्रं वाजासः सवनम् मदाय ।
तस्मै रयिम् ऋभवः सर्ववीरम् आ तक्षत वृषणो मन्दसानाः ॥ ४ ०३५ ०६
प्रातः सुतम् अपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते ।
सम् ऋभुभिः पिबस्व रत्नधेभिः सखीꣳर् याꣳइन्द्र चकृषे सुकृत्या ॥ ४ ०३५ ०७
ये देवासो अभवता सुकृत्या श्येना इवेद् अधि दिवि निषेद ।
ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥ ४ ०३५ ०८
यत् तृतीयं सवनं रत्नधेयम् अकृणुध्वं स्वपस्या सुहस्ताः ।
तद् ऋभवः परिषिक्तं व एतत् सम् मदेभिर् इन्द्रियेभिः पिबध्वम् ॥ ४ ०३५ ०९

(३३२)
अनश्वो जातो अनभीशुर् उक्थ्यो ३ रथस् त्रिचक्रः परि वर्तते रजः ।
महत् तद् वो देव्यस्य प्रवाचनं द्याम् ऋभवः पृथिवीं यच् च पुष्यथ ॥ ४ ०३६ ०१
रथं ये चक्रुः सुवृतं सुचेतसो ऽविह्वरन्तम् मनसस् परि ध्यया ।
ताँ ऊ न्व् अ १ स्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ॥ ४ ०३६ ०२
तद् वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन् महित्वनम् ।
जिव्री यत् सन्ता पितरा सनाजुरा पुनर् युवाना चरथाय तक्षथ ॥ ४ ०३६ ०३
एकं वि चक्र चमसं चतुर्वयं निश् चर्मणो गाम् अरिणीत धीतिभिः ।
अथा देवेष्व् अमृतत्वम् आनश श्रुष्टी वाजा ऋभवस् तद् व उक्थ्यम् ॥ ४ ०३६ ०४
ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यम् अजीजनन् नरः ।
विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासो ऽवथा स विचर्षणिः ॥ ४ ०३६ ०५
स वाज्य् अर्वा स ऋषिर् वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ।
स रायस् पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यम् आविषुः ॥ ४ ०३६ ०६
श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस् तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपश्चितस् तान् व एना ब्रह्मणा वेदयामसि ॥ ४ ०३६ ०७
यूयम् अस्मभ्यं धिषणाभ्यस् परि विद्वांसो विश्वा नर्याणि भोजना ।
द्युमन्तं वाजं वृषशुष्मम् उत्तमम् आ नो रयिम् ऋभवस् तक्षता वयः ॥ ४ ०३६ ०८
इह प्रजाम् इह रयिं रराणा इह श्रवो वीरवत् तक्षता नः ।
येन वयं चितयेमात्य् अन्यान् तं वाजं चित्रम् ऋभवो ददा नः ॥ ४ ०३६ ०९

(३३३)
उप नो वाजा अध्वरम् ऋभुक्षा देवा यात पथिभिर् देवयानैः ।
यथा यज्ञम् मनुषो विक्ष्व् आ ३ सु दधिध्वे रण्वाः सुदिनेष्व् अह्नाम् ॥ ४ ०३७ ०१
ते वो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः ।
प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः ॥ ४ ०३७ ०२

त्र्युदायं देवहितं यथा व स्तोमो वाजा ऋभुक्षणो ददे वः ।
जुह्वे मनुष्वद् उपरासु विक्षु युष्मे सचा बृहद्दिवेषु सोमम् ॥ ४ ०३७ ०३
पीवोअश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः ।
इन्द्रस्य सूनो शवसो नपातो ऽनु वश् चेत्य् अग्रियम् मदाय ॥ ४ ०३७ ०४
ऋभुम् ऋभुक्षणो रयिं वाजे वाजिन्तमं युजम् ।
इन्द्रस्वन्तं हवामहे सदासातमम् अश्विनम् ॥ ४ ०३७ ०५
सेद् ऋभवो यम् अवथ यूयम् इन्द्रश् च मर्त्यम् ।
स धीभिर् अस्तु सनिता मेधसाता सो अर्वता ॥ ४ ०३७ ०६
वि नो वाजा ऋभुक्षणः पथश् चितन यष्टवे ।
अस्मभ्यं सूरय स्तुता विश्वा आशास् तरीषणि ॥ ४ ०३७ ०७
तं नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम् ।
सम् अश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ॥ ४ ०३७ ०८

(३३४)
उतो हि वां दात्रा सन्ति पूर्वा या पूरुभ्यस् त्रसदस्युर् नितोशे ।
क्षेत्रासां ददथुर् उर्वरासां घनं दस्युभ्यो अभिभूतिम् उग्रम् ॥ ४ ०३८ ०१
उत वाजिनम् पुरुनिष्षिध्वानं दधिक्राम् उ ददथुर् विश्वकृष्टिम् ।
ऋजिप्यं श्येनम् प्रुषितप्सुम् आशुं चर्कृत्यम् अर्यो नृपतिं न शूरम् ॥ ४ ०३८ ०२
यं सीम् अनु प्रवतेव द्रवन्तं विश्वः पूरुर् मदति हर्षमाणः ।
पड्भिर् गृध्यन्तम् मेधयुं न शूरं रथतुरं वातम् इव ध्रजन्तम् ॥ ४ ०३८ ०३
यः स्मारुन्धानो गध्या समत्सु सनुतरश् चरति गोषु गच्छन् ।
आविरृजीको विदथा निचिक्यत् तिरो अरतिम् पर्य् आप आयोः ॥ ४ ०३८ ०४
उत स्मैनं वस्त्रमथिं न तायुम् अनु क्रोशन्ति क्षितयो भरेषु ।
नीचायमानं जसुरिं न श्येनं श्रवश् चाच्छा पशुमच् च यूथम् ॥ ४ ०३८ ०५
उत स्मासु प्रथमः सरिष्यन् नि वेवेति श्रेणिभी रथानाम् ।
स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत् किरणं ददश्वान् ॥ ४ ०३८ ०६
उत स्य वाजी सहुरिर् ऋतावा शुश्रूषमाणस् तन्वा समर्ये ।

तुरं यतीषु तुरयन्न् ऋजिप्यो ऽधि भ्रुवोः किरते रेणुम् ऋञ्जन् ॥ ४ ०३८ ०७
उत स्मास्य तन्यतोर् इव द्योर् ऋघायतो अभियुजो भयन्ते ।
यदा सहस्रम् अभि षीम् अयोधीद् दुर्वर्तुः स्मा भवति भीम ऋञ्जन् ॥ ४ ०३८ ०८
उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिम् आशोः ।
उतैनम् आहुः समिथे वियन्तः परा दधिक्रा असरत् सहस्रैः ॥ ४ ०३८ ०९
आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस् ततान ।
सहस्रसाः शतसा वाज्य् अर्वा पृणक्तु मध्वा सम् इमा वचांसि ॥ ४ ०३८ १०

(३३५)
आशुं दधिक्रां तम् उ नु ष्टवाम दिवस् पृथिव्या उत चर्किराम ।
उच्छन्तीर् माम् उषसः सूदयन्त्व् अति विश्वानि दुरितानि पर्षन् ॥ ४ ०३९ ०१
महश् चर्कर्म्य् अर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यम् पूरुभ्यो दीदिवांसं नाग्निं ददथुर् मित्रावरुणा ततुरिम् ॥ ४ ०३९ ०२
यो अश्वस्य दधिक्राव्णो अकारीत् समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तम् अदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥ ४ ०३९ ०३
दधिक्राव्ण इष ऊर्जो महो यद् अमन्महि मरुतां नाम भद्रम् ।
स्वस्तये वरुणम् मित्रम् अग्निं हवामह इन्द्रं वज्रबाहुम् ॥ ४ ०३९ ०४
इन्द्रम् इवेद् उभये वि ह्वयन्त उदीराणा यज्ञम् उपप्रयन्तः ।
दधिक्राम् उ सूदनम् मर्त्याय ददथुर् मित्रावरुणा नो अश्वम् ॥ ४ ०३९ ०५
दधिक्राव्णो अकारिषं जिष्णोर् अश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥ ४ ०३९ ०६

(३३६)
दधिक्राव्ण इद् उ नु चर्किराम विश्वा इन् माम् उषसः सूदयन्तु ।
अपाम् अग्नेर् उषसः सूर्यस्य बृहस्पतेर् आङ्गिरसस्य जिष्णोः ॥ ४ ०४० ०१
सत्वा भरिषो गविषो दुवन्यसच् छ्रवस्याद् इष उषसस् तुरण्यसत् ।

सत्यो द्रवो द्रवरः पतंगरो दधिक्रावेषम् ऊर्जं स्वर् जनत् ॥ ४ ०४० ०२
उत स्मास्य द्रवतस् तुरण्यतः पर्णं न वेर् अनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसम् परि दधिक्राव्णः सहोर्जा तरित्रतः ॥ ४ ०४० ०३
उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायाम् बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु संतवीत्वत् पथाम् अङ्कांस्य् अन्व् आपनीफणत् ॥ ४ ०४० ०४
हंसः शुचिषद् वसुर् अन्तरिक्षसद् धोता वेदिषद् अतिथिर् दुरोणसत् ।
नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ४ ०४० ०५

(३३७)
इन्द्रा को वां वरुणा सुम्नम् आप स्तोमो हविष्माँ अमृतो न होता ।
यो वां हृदि क्रतुमाँ अस्मद् उक्तः पस्पर्शद् इन्द्रावरुणा नमस्वान् ॥ ४ ०४१ ०१
इन्द्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् ।
स हन्ति वृत्रा समिथेषु शत्रून् अवोभिर् वा महद्भिः स प्र शृण्वे ॥ ४ ०४१ ०२
इन्द्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस् ता ।
यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥ ४ ०४१ ०३
इन्द्रा युवं वरुणा दिद्युम् अस्मिन्न् ओजिष्ठम् उग्रा नि वधिष्टं वज्रम् ।
यो नो दुरेवो वृकतिर् दभीतिस् तस्मिन् मिमाथाम् अभिभूत्य् ओजः ॥ ४ ०४१ ०४
इन्द्रा युवं वरुणा भूतम् अस्या धियः प्रेतारा वृषभेव धेनोः ।
सा नो दुहीयद् यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ ४ ०४१ ०५
तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश् च पौंस्ये ।
इन्द्रा नो अत्र वरुणा स्याताम् अवोभिर् दस्मा परितक्म्यायाम् ॥ ४ ०४१ ०६
युवाम् इद् ध्य् अवसे पूर्व्याय परि प्रभूती गविषः स्वापी ।
वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शम्भू ॥ ४ ०४१ ०७
ता वां धियो ऽवसे वाजयन्तीर् आजिं न जग्मुर् युवयूः सुदानू ।
श्रिये न गाव उप सोमम् अस्थुर् इन्द्रं गिरो वरुणम् मे मनीषाः ॥ ४ ०४१ ०८
इमा इन्द्रं वरुणम् मे मनीषा अग्मन्न् उप द्रविणम् इच्छमानाः ।
उपेम् अस्थुर् जोष्टार इव वस्वो रघ्वीर् इव श्रवसो भिक्षमाणाः ॥ ४ ०४१ ०९

अश्व्यस्य त्मना रथ्यस्य पुष्टेर् नित्यस्य रायः पतयः स्याम ।
ता चक्राणा ऊतिभिर् नव्यसीभिर् अस्मत्रा रायो नियुतः सचन्ताम् ॥ ४ ०४१ १०
आ नो बृहन्ता बृहतीभिर् ऊती इन्द्र यातं वरुण वाजसातौ ।
यद् दिद्यवः पृतनासु प्रक्रीळान् तस्य वां स्याम सनितार आजेः ॥ ४ ०४१ ११

(३३८)
मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर् विश्वे अमृता यथा नः ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेर् उपमस्य वव्रेः ॥ ४ ०४२ ०१
अहं राजा वरुणो मह्यं तान्य् असुर्याणि प्रथमा धारयन्त ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेर् उपमस्य वव्रेः ॥ ४ ०४२ ०२
अहम् इन्द्रो वरुणस् ते महित्वोर्वी गभीरे रजसी सुमेके ।
त्वष्टेव विश्वा भुवनानि विद्वान् सम् ऐरयं रोदसी धारयं च ॥ ४ ०४२ ०३
अहम् अपो अपिन्वम् उक्षमाणा धारयं दिवं सदन ऋतस्य ।
ऋतेन पुत्रो अदितेर् ऋतावोत त्रिधातु प्रथयद् वि भूम ॥ ४ ०४२ ०४
मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते ।
कृणोम्य् आजिम् मघवाहम् इन्द्र इयर्मि रेणुम् अभिभूत्योजाः ॥ ४ ०४२ ०५
अहं ता विश्वा चकरं नकिर् मा दैव्यं सहो वरते अप्रतीतम् ।
यन् मा सोमासो ममदन् यद् उक्थोभे भयेते रजसी अपारे ॥ ४ ०४२ ०६
विदुष् ते विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान् त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥ ४ ०४२ ०७
अस्माकम् अत्र पितरस् त आसन् सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजन्त त्रसदस्युम् अस्या इन्द्रं न वृत्रतुरम् अर्धदेवम् ॥ ४ ०४२ ०८
पुरुकुत्सानी हि वाम् अदाशद् धव्येभिर् इन्द्रावरुणा नमोभिः ।
अथा राजानं त्रसदस्युम् अस्या वृत्रहणं ददथुर् अर्धदेवम् ॥ ४ ०४२ ०९
राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुम् इन्द्रावरुणा युवं नो विश्वाहा धत्तम् अनपस्फुरन्तीम् ॥ ४ ०४२ १०

(३३९)
क उ श्रवत् कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते ।
कस्येमां देवीम् अमृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम् ॥ ४ ०४३ ०१
को मृळाति कतम आगमिष्ठो देवानाम् उ कतमः शम्भविष्ठः ।
रथं कम् आहुर् द्रवदश्वम् आशुं यं सूर्यस्य दुहितावृणीत ॥ ४ ०४३ ०२
मक्षू हि ष्मा गच्छथ ईवतो द्यून् इन्द्रो न शक्तिम् परितक्म्यायाम् ।
दिव आजाता दिव्या सुपर्णा कया शचीनाम् भवथः शचिष्ठा ॥ ४ ०४३ ०३
का वाम् भूद् उपमातिः कया न आश्विना गमथो हूयमाना ।
को वाम् महश् चित् त्यजसो अभीक उरुष्यतम् माध्वी दस्रा न ऊती ॥ ४ ०४३ ०४
उरु वां रथः परि नक्षति द्याम् आ यत् समुद्राद् अभि वर्तते वाम् ।
मध्वा माध्वी मधु वाम् प्रुषायन् यत् सीं वाम् पृक्षो भुरजन्त पक्वाः ॥ ४ ०४३ ०५
सिन्धुर् ह वां रसया सिञ्चद् अश्वान् घृणा वयो ऽरुषासः परि ग्मन् ।
तद् ऊ षु वाम् अजिरं चेति यानं येन पती भवथः सूर्यायाः ॥ ४ ०४३ ०६
इहेह यद् वां समना पपृक्षे सेयम् अस्मे सुमतिर् वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥ ४ ०४३ ०७

(३४०)
तं वां रथं वयम् अद्या हुवेम पृथुज्रयम् अश्विना संगतिं गोः ।
यः सूर्यां वहति वन्धुरायुर् गिर्वाहसम् पुरुतमं वसूयुम् ॥ ४ ०४४ ०१
युवं श्रियम् अश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर् वपुर् अभि पृक्षः सचन्ते वहन्ति यत् ककुहासो रथे वाम् ॥ ४ ०४४ ०२
को वाम् अद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥ ४ ०४४ ०३
हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातम् ।
पिबाथ इन् मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥ ४ ०४४ ०४
आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वाम् अन्ये नि यमन् देवयन्तः सं यद् ददे नाभिः पूर्व्या वाम् ॥ ४ ०४४ ०५

नू नो॑ र॒यिम् पु॑रु॒वीर॑म् बृ॒हन्तं॒ दस्रा॒ मिमा॑थाम् उ॒भयेष्व् अ॒स्मे ।
नरो॒ यद् वा॑म् अश्विना॒ स्तोम॒म् आव॑न् स॒धस्तु॑तिम् आजमी॒ळ्हासो॑ अग्मन् ॥ ४ ०४४ ०६
इ॒हेह॒ यद् वां॑ सम॒ना प॑पृ॒क्षे सेयम् अ॒स्मे सु॑म॒तिर् वा॑जरत्ना ।
उ॒रु॒ष्यतं॑ जरि॒तारं॑ यु॒वं ह॑ श्रि॒तः कामो॑ नासत्या यु॒वद्रिक् ॥ ४ ०४४ ०७

(३४१)
ए॒ष स्य भा॒नुर् उद् इ॑यर्ति यु॒ज्यते॒ रथः॒ परि॑ज्मा दि॒वो अ॒स्य सान॑वि ।
पृ॒क्षासो॑ अस्मिन् मिथु॒ना अधि॒ त्रयो॒ दृति॑स् तु॒रीयो॒ मधु॑नो॒ वि र॑प्शते ॥ ४ ०४५ ०१
उद् वा॑म् पृ॒क्षासो॒ मधु॑मन्त ईरते॒ रथा॒ अश्वा॑स उ॒षसो॒ व्यु॑ष्टिषु ।
अ॒पो॒र्णु॒वन्त॒स् तम॒ आ परी॑वृतं॒ स्व१ र् ण शु॒क्रं त॒न्वन्त॒ आ रजः॑ ॥ ४ ०४५ ०२
मध्वः॑ पिबतम् मधु॒पेभि॑र् आ॒सभि॑र् उ॒त प्रि॒यम् मधु॑ने युञ्जाथां॒ रथ॑म् ।
आ व॑र्त॒निम् मधु॑ना जिन्वथस् प॒थो दृतिं॑ वहेथे॒ मधु॑मन्तम् अश्विना ॥ ४ ०४५ ०३
ह॒ंसासो॒ ये वा॒म् मधु॑मन्तो अ॒स्रिधो॒ हिर॑ण्यपर्णा उ॒हुव॑ उष॒र्बुधः॑ ।
उ॒द॒प्रुतो॑ म॒न्दिनो॑ मन्दिनि॒स्पृशो॒ मध्वो॒ न मक्षः॒ सव॑नानि गच्छथः ॥ ४ ०४५ ०४
स्व॒ध्व॒रासो॒ मधु॑मन्तो अ॒ग्नय॑ उ॒स्रा ज॑रन्ते॒ प्रति॒ वस्तो॑र् अ॒श्विना॑ ।
यन् नि॒क्तह॑स्तस् त॒रणि॑र् विचक्षणः॒ सोमं॑ सु॒षाव॒ मधु॑मन्त॒म् अद्रि॑भिः ॥ ४ ०४५ ०५
आ॒के॒नि॒पासो॒ अह॑भिर् दवि॑ध्वतः॒ स्व१ र् ण शु॒क्रं त॒न्वन्त॒ आ रजः॑ ।
सूर॑श् चि॒द् अश्वा॑न् युयुजा॒न ई॑यते॒ विश्वा॒ँ अनु॑ स्व॒धया॑ चेतथस् प॒थः ॥ ४ ०४५ ०६
प्र वा॑म् अवोचम् अश्विना धिय॒ंधा रथः॒ स्वश्वो॑ अ॒जरो॒ यो अस्ति॑ ।
येन॑ स॒द्यः परि॒ रजां॑सि या॒थो ह॒विष्म॑न्तं त॒रणि॑म् भो॒जम् अच्छ॑ ॥ ४ ०४५ ०७

(३४२)
अग्र॑म् पिबा॒ मधू॑नां सु॒तं वा॑यो॒ दिवि॑ष्टिषु ।
त्वं हि पू॑र्व॒पा असि॑ ॥ ४ ०४६ ०१
श॒तेना॑ नो अ॒भिष्टि॑भिर् नि॒युत्वा॒ँ इन्द्र॑सारथिः ।
वायो॑ सु॒तस्य॑ तृम्पतम् ॥ ४ ०४६ ०२

आ वां॑ स॒हस्रं॒ हर॑य॒ इन्द्र॑वायू अ॒भि प्रयः॑ ।
वह॑न्तु॒ सोम॑पीतये ॥ ४ ०४६ ०३
रथं॒ हिर॑ण्यवन्धुर॒म् इन्द्र॑वायू स्वध्व॒रम् ।
आ हि स्थाथो॑ दिवि॒स्पृश॑म् ॥ ४ ०४६ ०४
रथे॑न पृथु॒पाज॑सा दा॒श्वांस॒म् उप॑ गच्छतम् ।
इन्द्र॑वायू इ॒हा ग॑तम् ॥ ४ ०४६ ०५
इन्द्र॑वायू अ॒यं सु॒तस् तं दे॒वेभिः॑ स॒जोष॑सा ।
पिब॑तं दा॒शुषो॑ गृ॒हे ॥ ४ ०४६ ०६
इ॒ह प्र॒याण॑म् अस्तु वा॒म् इन्द्र॑वायू वि॒मोच॑नम् ।
इ॒ह वां॒ सोम॑पीतये ॥ ४ ०४६ ०७

(३४३)
वायो॑ शु॒क्रो अ॑यामि ते॒ मध्वो॒ अग्रं॒ दिवि॑ष्टिषु ।
आ या॑हि॒ सोम॑पीतये स्पा॒र्हो दे॑व नि॒युत्व॑ता ॥ ४ ०४७ ०१
इन्द्र॑श् च वायव् एषां॒ सोमा॑नाम् पी॒तिम् अ॑र्हथः ।
यु॒वां हि यन्तीन्द॑वो नि॒म्नम् आपो॒ न स॒ध्र्यक् ॥ ४ ०४७ ०२
वाय॒व् इन्द्र॑श् च शु॒ष्मिणा॑ स॒रथं॑ शवसस् पती ।
नि॒युत्व॑न्ता न ऊ॒तय॒ आ या॑तं॒ सोम॑पीतये ॥ ४ ०४७ ०३
या वां॒ सन्ति॑ पुरु॒स्पृहो॑ नि॒युतो॑ दा॒शुषे॑ नरा ।
अ॒स्मे ता य॑ज्ञवाह॒सेन्द्र॑वायू॒ नि य॑च्छतम् ॥ ४ ०४७ ०४

(३४४)
वि॒हि होत्रा अवी॑ता॒ विपो॒ न रायो॑ अ॒र्यः ।
वाय॒व् आ च॒न्द्रेण॒ रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑ ॥ ४ ०४८ ०१
नि॒र्यु॒वाणो अश॑स्तीर् नि॒युत्वाँ॒ इन्द्र॑सारथिः ।
वाय॒व् आ च॒न्द्रेण॒ रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑ ॥ ४ ०४८ ०२

अनु॑ कृ॒ष्णे वसु॑धिती ये॒माते॑ वि॒श्वपे॑शसा ।
वा॒य॒व् आ च॒न्द्रेण॒ रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑ ॥ ४ ०४८ ०३
व॒ह॑न्तु त्वा मनो॒युजो॑ यु॒क्तासो॑ नव॒तिर् नव॑ ।
वा॒य॒व् आ च॒न्द्रेण॒ रथे॑न या॒हि सु॒तस्य॑ पी॒तये॑ ॥ ४ ०४८ ०४
वायो॑ श॒तं हरी॑णां यु॒वस्व॒ पोष्या॑णाम् ।
उ॒त वा॑ ते सह॒स्रिणो॒ रथ॒ आ या॑तु॒ पाज॑सा ॥ ४ ०४८ ०५

(३४५)
इ॒दं वा॑म् आ॒स्ये ह॒विः प्रि॒यम् इ॑न्द्राबृहस्पती ।
उ॒क्थम् मद॑श् च शस्यते ॥ ४ ०४९ ०१
अ॒यं वा॒म् परि॑ षिच्यते॒ सोम॑ इन्द्राबृहस्पती ।
चारु॒र् मदा॑य पी॒तये॑ ॥ ४ ०४९ ०२
आ न॑ इन्द्राबृहस्पती गृ॒हम् इन्द्र॑श् च गच्छतम् ।
सो॒म॒पा सोम॑पीतये ॥ ४ ०४९ ०३
अ॒स्मे इ॑न्द्राबृहस्पती र॒यिं ध॑त्तं शत॒ग्विन॑म् ।
अश्वा॑वन्तं सह॒स्रिण॑म् ॥ ४ ०४९ ०४
इन्द्रा॒बृह॒स्पती॑ व॒यं सु॒ते गी॒र्भिर् ह॑वामहे ।
अ॒स्य सोम॑स्य पी॒तये॑ ॥ ४ ०४९ ०५
सोम॑म् इन्द्राबृहस्पती॒ पिब॑तं दा॒शुषो॑ गृ॒हे ।
मा॒दये॑था॒ं तदो॑कसा ॥ ४ ०४९ ०६

(३४६)
यस् त॒स्तम्भ॒ सह॑सा॒ वि ज्मो अन्ता॒न् बृह॒स्पति॑स् त्रिषध॒स्थो रवे॑ण ।
तम् प्र॒त्नास॒ ऋष॑यो॒ दीध्या॑नाः पु॒रो विप्रा॑ दधिरे म॒न्द्रजि॑ह्वम् ॥ ४ ०५० ०१
धु॒नेत॑यः सुप्रके॒तम् मद॑न्तो॒ बृह॑स्पते अ॒भि ये न॑स् तत॒स्रे ।
पृष॑न्तं सृ॒प्रम् अद॑ब्धम् ऊ॒र्वम् बृह॑स्पते॒ रक्ष॑ताद् अ॒स्य॒ योनि॑म् ॥ ४ ०५० ०२

बृहस्पते या परमा परावद् अत आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता अद्रिदुग्धा मध्व श्चोतन्त्य् अभितो विरप्शम् ॥ ४ ०५० ०३
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस् तुविजातो रवेण वि सप्तरश्मिर् अधमत् तमांसि ॥ ४ ०५० ०४
स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिर् उस्रिया हव्यसूदः कनिक्रदद् वावशतीर् उद् आजत् ॥ ४ ०५० ०५
एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर् विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥ ४ ०५० ०६
स इद् राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थाव् अभि वीर्येण ।
बृहस्पतिं यः सुभृतम् बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥ ४ ०५० ०७
स इत् क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयम् एवा नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति ॥ ४ ०५० ०८
अप्रतीतो जयति सं धनानि प्रतिजन्यान्य् उत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तम् अवन्ति देवाः ॥ ४ ०५० ०९
इन्द्रश् च सोमम् पिबतम् बृहस्पते ऽस्मिन् यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्व् इन्दवः स्वाभुवो ऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥ ४ ०५० १०
बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर् भूत्व् अस्मे ।
अविष्टं धियो जिगृतम् पुरंधीर् जजस्तम् अर्यो वनुषाम् अरातीः ॥ ४ ०५० ११

(३४७)

इदम् उ त्यत् पुरुतमम् पुरस्ताज् ज्योतिस् तमसो वयुनावद् अस्थात् ।
नूनं दिवो दुहितरो विभातीर् गातुं कृणवन्न् उषसो जनाय ॥ ४ ०५१ ०१
अस्थुर् उ चित्रा उषसः पुरस्तान् मिता इव स्वरवो ऽध्वरेषु ।
व्य् ऊ व्रजस्य तमसो द्वारोच्छन्तीर् अव्रञ् छुचयः पावकाः ॥ ४ ०५१ ०२
उच्छन्तीर् अद्य चितयन्त भोजान् राधोदेयायोषसो मघोनीः ।
अचित्रे अन्तः पणयः ससन्त्व् अबुध्यमानास् तमसो विमध्ये ॥ ४ ०५१ ०३
कुवित् स देवीः सनयो नवो वा यामो बभूयाद् उषसो वो अद्य ।

येना नवग्वे अङ्गिरे दशग्वे सप्तास्ये रेवती रेवद् ऊष ॥ ४ ०५१ ०४
यूयं हि देवीर् ऋतयुग्भिर् अश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयन्तीर् उषसः ससन्तं द्विपाच् चतुष्पाच् चरथाय जीवम् ॥ ४ ०५१ ०५
क्व स्विद् आसां कतमा पुराणी यया विधाना विदधुर् ऋभूणाम् ।
शुभं यच् छुभ्रा उषसश् चरन्ति न वि ज्ञायन्ते सदृशीर् अजुर्याः ॥ ४ ०५१ ०६
ता घा ता भद्रा उषसः पुरासुर् अभिष्टिद्युम्ना ऋतजातसत्याः ।
यास्व् ईजानः शशमान उक्थैः स्तुवञ् छंसन् द्रविणं सद्य आप ॥ ४ ०५१ ०७
ता आ चरन्ति समना पुरस्तात् समानतः समना पप्रथानाः ।
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते ॥ ४ ०५१ ०८
ता इन् न्व् एव समना समानीर् अमीतवर्णा उषसश् चरन्ति ।
गूहन्तीर् अभ्वम् असितं रुशद्भिः शुक्रास् तनूभिः शुचयो रुचानाः ॥ ४ ०५१ ०९
रयिं दिवो दुहितरो विभातीः प्रजावन्तं यच्छतास्मासु देवीः ।
स्योनाद् आ वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ॥ ४ ०५१ १०
तद् वो दिवो दुहितरो विभातीर् उप ब्रुव उषसो यज्ञकेतुः ।
वयं स्याम यशसो जनेषु तद् द्यौश् च धत्ताम् पृथिवी च देवी ॥ ४ ०५१ ११

(३४८)
प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः ।
दिवो अदर्शि दुहिता ॥ ४ ०५२ ०१
अश्वेव चित्रारुषी माता गवाम् ऋतावरी ।
सखाभूद् अश्विनोर् उषाः ॥ ४ ०५२ ०२
उत सखास्य् अश्विनोर् उत माता गवाम् असि ।
उतोषो वस्व ईशिषे ॥ ४ ०५२ ०३
यावयद्द्वेषसं त्वा चिकित्वित् सूनृतावरि ।
प्रति स्तोमैर् अभुत्स्महि ॥ ४ ०५२ ०४
प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः ।
ओषा अप्रा उरु ज्रयः ॥ ४ ०५२ ०५

आपप्रुषी विभावरि व्य् आवर् ज्योतिषा तमः ।
उषो अनु स्वधाम् अव ॥ ४ ०५२ ०६
आ द्यां तनोषि रश्मिभिर् आन्तरिक्षम् उरु प्रियम् ।
उषः शुक्रेण शोचिषा ॥ ४ ०५२ ०७

(३४९)
तद् देवस्य सवितुर् वार्यम् महद् वृणीमहे असुरस्य प्रचेतसः ।
छर्दिर् येन दाशुषे यच्छति त्मना तन् नो महाँउद् अयान् देवो अक्तुभिः ॥ ४ ०५३ ०१
दिवो धर्ता भुवनस्य प्रजापतिः पिशङ्गं द्रापिम् प्रति मुञ्चते कविः ।
विचक्षणः प्रथयन्न् आपृणन्न् उर्व् अजीजनत् सविता सुम्नम् उक्थ्यम् ॥ ४ ०५३ ०२
आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।
प्र बाहू अस्राक् सविता सवीमनि निवेशयन् प्रसुवन्न् अक्तुभिर् जगत् ॥ ४ ०५३ ०३
अदाभ्यो भुवनानि प्रचाकशद् व्रतानि देवः सविताभि रक्षते ।
प्रास्रागि् बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति ॥ ४ ०५३ ०४
त्रिर् अन्तरिक्षं सविता महित्वना त्री रजांसि परिभुस् त्रीणि रोचना ।
तिस्रो दिवः पृथिवीस् तिस्र इन्वति त्रिभिर् व्रतैर् अभि नो रक्षति त्मना ॥ ४ ०५३ ०५
बृहत्सुम्नः प्रसवीता निवेशनो जगत स्थातुर् उभयस्य यो वशी ।
स नो देवः सविता शर्म यच्छत्व् अस्मे क्षयाय त्रिवरूथम् अंहसः ॥ ४ ०५३ ०६
आगन् देव ऋतुभिर् वर्धतु क्षयं दधातु नः सविता सुप्रजाम् इषम् ।
स नः क्षपाभिर् अहभिश् च जिन्वतु प्रजावन्तं रयिम् अस्मे सम् इन्वतु ॥ ४ ०५३ ०७

(३५०)
अभूद् देवः सविता वन्द्यो नु न इदानीम् अह्न उपवाच्यो नृभिः ।
वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥ ४ ०५४ ०१
देवेभ्यो हि प्रथमं यज्ञियेभ्यो ऽमृतत्वं सुवसि भागम् उत्तमम् ।

आद् इद् दा॒मानं॑ सवित॒र् व्य् ऊर्णुषे ऽनूची॒ना जी॑वि॒ता मानु॑षेभ्यः ॥ ४ ०५४ ०२
अचि॑त्ती॒ यच् च॑कृ॒मा दैव्ये॒ जने॑ दी॒नैर् दक्षैः॒ प्रभू॑ती पूरुष॒त्वता॑ ।
दे॒वेषु॑ च सवित॒र् मानुषेषु च॒ त्वं नो॒ अत्र॑ सुवता॒द् अना॑गसः ॥ ४ ०५४ ०३
न प्र॒मिये॑ सवि॒तुर् दैव्य॑स्य॒ तद् यथा॒ विश्व॒म् भुव॑नं धारयि॒ष्यति॑ ।
यत् पृ॑थि॒व्या वरि॑म॒न्न् आ स्व॑ङ्गु॒रिर् वर्ष्म॑न् दि॒वः सु॒वति॑ स॒त्यम् अ॑स्य॒ तत् ॥ ४ ०५४
०४
इन्द्र॑ज्येष्ठान् बृ॒हद्भ्य॒ः पर्व॑तेभ्य॒ः क्षयाँ॑ ए॒भ्यः सुवसि प॒स्त्याव॑तः ।
यथा॑-यथा प॒तय॑न्तो वियेमि॒र ए॒वैव त॑स्थुः सवितः स॒वाय॑ ते ॥ ४ ०५४ ०५
ये ते॒ त्रिर् अह॑न् सवितः स॒वासो॑ दि॒वे-दि॑वे सौभ॑गम् आसु॒वन्ति॑ ।
इन्द्रो॒ द्यावा॑पृथि॒वी सिन्धु॑र् अ॒द्भिर् आ॑दि॒त्यैर् नो॒ अदि॑ति॒ः शर्म॑ यंसत् ॥ ४ ०५४ ०६

(३५१)
को व॑स् त्रा॒ता व॑सव॒ः को व॑रू॒ता द्यावा॑भूमी अदिते॒ त्रासी॑थां नः ।
सही॑यसो वरुण मित्र मर्ता॒त् को वो॑ ऽध्व॒रे वरि॑वो धाति देवाः ॥ ४ ०५५ ०१
प्र ये धामा॑नि पू॒र्व्याण्य् अर्चा॒न् वि यद् उ॒च्छान् वि॑यो॒तारो॒ अमू॑राः ।
वि॒धा॒तारो॒ वि ते द॑धुर् अज॑स्रा ऋ॒तधी॑तयो रुरुचन्त द॒स्माः ॥ ४ ०५५ ०२
प्र प॒स्त्या॒ ३॑ म् अदि॑ति॒ं सिन्धु॑म् अ॒र्कैः स्व॒स्तिम् ई॑ळे स॒ख्याय॑ दे॒वीम् ।
उ॒भे यथा॑ नो॒ अह॑नी नि॒पात॑ उ॒षासा॒नक्ता॑ करता॒म् अद॑ब्धे ॥ ४ ०५५ ०३
व्य् अ॑र्य॒मा वरु॑णश् चेति॒ पन्था॑म् इ॒षस् पतिः॑ सुवि॒तं गा॒तुम् अ॒ग्निः ।
इन्द्रा॑विष्णू नृ॒वद् उ॒ षु स्तवा॑ना॒ शर्म॑ नो यन्त॒म् अम॑वद् वरू॑थम् ॥ ४ ०५५ ०४
आ पर्व॑तस्य म॒रुता॒म् अवां॑सि दे॒वस्य॑ त्रा॒तुर् अ॑व्रि॒ भग॑स्य ।
पात् पति॒र् जन्या॒द् अंह॑सो नो मि॒त्रो मि॒त्रिया॑द् उ॒त न॑ उरुष्येत् ॥ ४ ०५५ ०५
नू रोद॑सी॒ अहि॑ना बु॒ध्न्येन स्तुवी॒त दे॑वी॒ अप्ये॑भिर् इ॒ष्टैः ।
स॒मु॒द्रं न सं॒चर॑णे सनि॒ष्यवो॑ घ॒र्मस्व॑रसो न॒द्यो॒ ३॑ अप॑ व्रन् ॥ ४ ०५५ ०६
दे॒वैर् नो॑ दे॒व्य् अदि॑ति॒र् नि पा॑तु दे॒वस् त्रा॒ता त्रा॑यता॒म् अप्र॑युच्छन् ।
न॒हि मि॒त्रस्य॒ वरु॑णस्य धा॒सिम् अर्हा॑मसि प्र॒मियं॒ सान्व् अ॒ग्नेः ॥ ४ ०५५ ०७
अ॒ग्निर् ईशे॑ व॒सव्य॑स्या॒ग्निर् म॒हः सौभ॑गस्य ।

तान्य् अस्मभ्यं रासते ॥ ४ ०५५ ०८
उषो मघोन्य् आ वह सूनृते वार्या पुरु ।
अस्मभ्यं वाजिनीवति ॥ ४ ०५५ ०९
तत् सु नः सविता भगो वरुणो मित्रो अर्यमा ।
इन्द्रो नो राधसा गमत् ॥ ४ ०५५ १०

(३५२)
मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिर् अर्कैः ।
यत् सीं वरिष्ठे बृहती विमिन्वन् रुवद् धोक्षा पप्रथानेभिर् एवैः ॥ ४ ०५६ ०१
देवी देवेभिर् यजते यजत्रैर् अमिनती तस्थतुर् उक्षमाणे ।
ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिर् अर्कैः ॥ ४ ०५६ ०२
स इत् स्वपा भुवनेष्व् आस य इमे द्यावापृथिवी जजान ।
उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या सम् ऐरत् ॥ ४ ०५६ ०३
नू रोदसी बृहद्भिर् नो वरूथैः पत्नीवद्भिर् इषयन्ती सजोषाः ।
उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः ॥ ४ ०५६ ०४
प्र वाम् महि द्यवी अभ्य् उपस्तुतिम् भरामहे ।
शुची उप प्रशस्तये ॥ ४ ०५६ ०५
पुनाने तन्वा मिथः स्वेन दक्षेण राजथः ।
ऊह्याथे सनाद् ऋतम् ॥ ४ ०५६ ०६
मही मित्रस्य साधथस् तरन्ती पिप्रती ऋतम् ।
परि यज्ञं नि षेदथुः ॥ ४ ०५६ ०७

(३५३)
क्षेत्रस्य पतिना वयं हितेनेव जयामसि ।
गाम् अश्वम् पोषयित्न्व् आ स नो मृळातीदृशे ॥ ४ ०५७ ०१
क्षेत्रस्य पते मधुमन्तम् ऊर्मिं धेनुर् इव पयो अस्मासु धुक्ष्व ।

मधुश्चुतं घृतम् इव सुपूतम् ऋतस्य नः पतयो मृळयन्तु ॥ ४ ०५७ ०२
मधुमतीर् ओषधीर् द्याव आपो मधुमन् नो भवत्व् अन्तरिक्षम् ।
क्षेत्रस्य पतिर् मधुमान् नो अस्त्व् अरिष्यन्तो अन्व् एनं चरेम ॥ ४ ०५७ ०३
शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम् ।
शुनं वरत्रा बध्यन्तां शुनम् अष्ट्राम् उद् इङ्गय ॥ ४ ०५७ ०४
शुनासीराव् इमां वाचं जुषेथां यद् दिवि चक्रथुः पयः ।
तेनेमाम् उप सिञ्चतम् ॥ ४ ०५७ ०५
अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ॥ ४ ०५७ ०६
इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहाम् उत्तराम्-उत्तरां समाम् ॥ ४ ०५७ ०७
शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनम् पर्जन्यो मधुना पयोभिः शुनासीरा शुनम् अस्मासु धत्तम् ॥ ४ ०५७ ०८

(३५४)
समुद्राद् ऊर्मिर् मधुमाँ उद् आरद् उपांशुना सम् अमृतत्वम् आनट् ।
घृतस्य नाम गुह्यं यद् अस्ति जिह्वा देवानाम् अमृतस्य नाभिः ॥ ४ ०५८ ०१
वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच् छस्यमानं चतुःशृङ्गो ऽवमीद् गौर एतत् ॥ ४ ०५८ ०२
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥ ४ ०५८ ०३
त्रिधा हितम् पणिभिर् गुह्यमानं गवि देवासो घृतम् अन्व् अविन्दन् ।
इन्द्र एकं सूर्य एकं जजान वेनाद् एकं स्वधया निष् टतक्षुः ॥ ४ ०५८ ०४
एता अर्षन्ति हृद्यात् समुद्राच् छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ ४ ०५८ ०५
सम्यक् स्रवन्ति सरितो न धेना अन्तर् हृदा मनसा पूयमानाः ।
एते अर्षन्त्य् ऊर्मयो घृतस्य मृगा इव क्षिपणोर् ईषमाणाः ॥ ४ ०५८ ०६

सिन्धोर् इव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्न् ऊर्मिभिः पिन्वमानः ॥ ४ ०५८ ०७
अभि प्रवन्त समनेव योषाः कल्याण्य १ः स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ ४ ०५८ ०८
कन्या इव वहतुम् एतवा उ अञ्ज्य् अञ्जाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते ॥ ४ ०५८ ०९
अभ्य् अर्षत सुष्टुतिं गव्यम् आजिम् अस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ते ॥ ४ ०५८ १०
धामन् ते विश्वम् भुवनम् अधि श्रितम् अन्तः समुद्रे हृद्य् अ १ न्तर् आयुषि ।
अपाम् अनीके समिथे य आभृतस् तम् अश्याम मधुमन्तं त ऊर्मिम् ॥ ४ ०५८ ११